The commentary of "parāpareṇa bhedena (through being divided in superior and inferior varieties)" done by some interpreters, namely "superior, i. e. the *Kāmikāgama*, etc. which are Śiva's knowledge; inferior, i. e. *vedas*, etc. which are bound soul's knowledge", that commentary does not touch the present context. The present context is the manifoldness of that knowledge which is a means of realising the fruit mentioned above (st. 2). And *vedas*, etc. are not fit to be means of realising that fruit. If *vedas* are means of realising that fruit, Śiva's knowledge comes in excess and *vedas* are no more inferior,[they become superior]. One could object that the author, after saying that "the *śakti* of the god

भिद्यत इति वक्ष्यति । सत्यम्, किंतु तत्र तच्छब्दराशेरविशिष्टस्य प्रमितत्वाद्युक्तं वक्तुम् इह [७२]विशिष्टमेवोक्तफलसाधकं ज्ञानं प्रकृतम् । किं च शब्दराशेर्विशेषश्चाबाधितः शिवात्मकः, [७३]अन्यतरश्च पाशात्मकः । यः शिवात्मकः स कामिकादिभेदेन भिद्यते, यस्तु पाशात्मकः [७४]स वेदादिभेदेन । किमर्थमेवं कल्प्यते । यतो न पाशात्मकं वस्तु शिवाद्यं प्रकाशयितुं शक्नोति । नापि शैवमनुग्राहकम् । निर्दिष्टेऽर्थे परत्वप्रतिपत्तिं जनयति । इदं तर्हि "या शक्तिर्देवदेवस्य" इति [७५]कथम् । यावती पदार्थज्ञानस्य शक्तिः, सा सर्वा देवदेवस्य शक्तिः, यतस्तेन प्रयुक्तया [७६]प्रवर्तते । तत्रैका तत्समवायिनी, अन्यापि पदार्थान्तरवर्तिनीति [७७]विशेषः । तस्मादुक्तफलसाधकस्यैव [७८]ज्ञानस्य परापरेण भेदेनेत्यत्र परापरत्वं युक्तं व्याख्यातुम् ।

एवमेतदित्यादि [७९]स्वयंभुव[ः] श्लोकः । अनेन हि स्वयंभूरनन्तरोक्तस्य गोरवसूत्रद्वयस्य भविष्यतां च [८०]गुरुसूत्राणामर्थविभागं दर्शयति ।

[८१]एवमेतत्सुरेशानः शास्त्रसद्भावमुत्तमम् ।
सूत्रद्वयेन [८२]संगृह्य प्राह [८३]विस्तरशः पुनः ॥ ४ ॥

[८४]**शास्त्रसद्भावमिति** ज्ञानस्य सद्भावं विशेषणविशेष्यत्वेन व्यवस्थितम् । तत्र सारभूतमात्मादिम् **उत्तमं** पशुदृशामगोचरं **संगृह्य** पिण्डीकृत्य प्राह ।

अथात्माविमल इत्यादि नैधनेशं सूत्रम् ।

अथात्माविमलो बद्धः [८५]पुनर्मुक्तश्च दीक्षया ।
विज्ञेयः स त्रिधावस्थः केवलः सकलोऽमलः ॥ ५ ॥

अथेति शास्त्रसद्भावस्य संग्रहकरणादनन्तरं [८६]विस्तारव्याख्यानमिति । शास्त्रसद्भावस्या

of gods is his knowledge itself" (V. 4), will say later that Śiva's knowledge is divided in *vedas*, etc.[32]. That is true. But in that later passage it is appropriately told thus, because the undifferentiated mass of all speech is considered, whereas here the specific knowledge which is the means of realising the afore-mentioned fruit is dealt with. Moreover in the mass of all speech there is a variety which is not contradicted by anything and which is made of śiva, there is another variety which is a bond. That one which is śiva is divided in *Kāmika*, etc.; that one which is a bond is divided in the *vedas*, etc. Why [such a division] is conceived ? Because that which is a bond cannot shed light on realities like Śiva, etc.; neither is it issued from Śiva, neither does it give grace. And [the present text] produces the understanding of superiority for the object it mentions[33]. [One could object] then : how is it told "the power of the god of gods..." [which means :] all the power of knowledge of things, as much as it exists, is the *śakti* of the god of gods, since it works through the impulse given by him[34] [We answer :] there is one *śakti* of knowledge which is proper to Śiva and non-separable from him, there is another power situated in other things also. Therefore it is proper to explain the superiority and inferiority mentioned in "parāpareṇa bhedena" as properties of only the knowledge which is a means of realising the afore-mentioned fruit.

"Evam etat..." is a stanza enunciated by Svayaṃbhū. By this stanza Svayaṃbhū shows the respective meaning of the two utterances of his guru told just before (st. 2-3) and his guru's coming utterances.

The Lord of gods [Nidhaneśa] having thus summarised the supreme real intent of the teaching in two utterances, enunciated it again in an extended form. 4

"Śāstrasadbhāvam" : the real intent of [this] knowledge, i. e. that which is established as qualifier and qualified entity. "Saṃgṛhya" i. e. having condensed the meaning, soul, etc., which is the essence of this [knowledge], which is "uttamam" i. e. not accessible to the knowledge of bound souls, [the Lord of gods] pronounced it under the form : "athātmāvimalaḥ...".

Now an utterance of Nidhaneśa :

Then the soul is non-devoid of *mala*, bound or liberated through *dīkṣā*. It should be known as going through three states, isolated, united with *kalā*, freed from *mala*. 5

"Atha" : the commentary in extended form comes immediately after the summary of the real intent of the teachings. The soul mentioned in the beginning of this [summary] of

दावुपन्यस्त आत्मा व्याक्रियते । स च त्र्यवस्थ अविमलो बद्धो मुक्त इति । न विमल **अविमल** अत्यन्तमलिन इत्यर्थः । स एव च पुनर्मलयुक्तः [८७]कर्मानुरक्तश्च सन् **बद्धः** कलादिना बन्धेन । स एव च पुनर्मुक्तो मलादिकाद्दीक्षाख्येन साधनात्मना ।

[८८]अविमलस्य बद्धस्य च न विशेषः, येनोभयोरप्यवैमल्यं बन्धवत्त्वात्, पशुट्टङ्मुक्तस्य शैवमुक्तस्य च न विशेष इति विशेषमाह – **केवलः सकलोऽमल** इति । सत्यपि बन्धे **केवलः** कलादिकलापरहितः सन्नविमलः । सत्यप्यवैमल्ये **सकलः** कलादिकलापयुक्तः सन् बद्धः । पशुट्टङ्मुक्तो मलयुक्तः, शैवस्तु **अमलो** मुक्त इति ।

[८९]एवमात्माविस्तरेण व्याख्यातः । तस्येदानीमाध्यायपरिसमाप्तेरतिविस्तरव्याख्यानम् **अचेतन** इत्यादि ।

> अचेतनो विभुर्नित्यो गुणहीनोऽक्रियोऽप्रभुः ।
> [९०]व्याघातभागशक्तश्च शोध्यो बोध्योऽकलः पशुः ॥ ६ ॥

केवलार्थव्याकृतिः । चैतन्यं ज्ञानकर्तृत्वरूपं बलमात्मनः । तन्नित्यम् । तदत्र ज्ञानमात्रं विवक्षितम् । न सकलं तदस्य मलेन संनिरुद्धत्वात् । [९१]तन्नार्थेषु प्रवर्तत इति **अचेतनः** । चैतन्यस्याभिव्यक्तिश्रुतेः **विभुः** । यतोऽस्य यत्र यत्र व्यञ्जकस्तत्र [९२]तत्र गुणव्यक्तिर्भविष्यति, अवस्थाविशिष्टस्य श्रुतत्वात् । इयं चावस्थास्य निवर्तिष्यत इति **नित्यः** । नित्यस्य च ततो [९३]निवर्त्यार्हत्वं न भवतीति । तदन्यस्यानित्यस्य स्वकारणादुत्पन्नस्य [९४]स्वकारणे प्रलयो यत्तद-नित्यत्वं तदस्य नास्तीति । भोगसिद्ध्यर्थमस्याङ्गानि गुणाः कलादयः, तैर्हीनो **गुणहीन** इति ।

the real intent of the teachings is [now] analysed. It goes through three states : non-devoid of *mala*, bound, liberated. "Avimalaḥ" means 'non-devoid of *mala*', i. e. extremely attached to *mala*. This same soul again, being united with *mala* and coloured by *karman*, is '*bound*' by the bond of *kalā*, etc. This same soul again is '*liberated*' from *mala*, etc. through that which is called *dīkṣā* and which is a means of realisation [of liberation].

[One could object :] there is no difference between the soul non-devoid of *mala* and the bound soul, because they have a bond, as there is the quality of being non-devoid of *mala* in both of them; there is no difference between the liberated soul which has a knowledge of a bound one and the liberated soul which is Śiva[35]. [To answer to that, Nidhaneśa] says the difference : "kevalaḥ sakalo 'malaḥ (isolated, united with *kalā*, freed from *mala*)". The soul non-devoid of *mala* is a soul who, being devoid of the group of *kalā*, etc., is isolated [i. e. liberated], even though it has a bond.

The bound soul is a soul who, being united with the group of *kalā*, etc. is 'united with *kalā*', even though it is non-devoid of *mala*. The liberated soul whose knowledge is that of bound souls is united with *mala*, but the liberated soul who has the nature of Śiva is freed from *mala*.

The soul has been thus described but not in details. Now an exposition of the same with the maximum of details is done up to the end of the chapter : "acetanaḥ...".

The bound soul which is non-tied to *kalā* is deprived of consciousness, ubiquitous, eternal, devoid of auxiliaries, devoid of action, non-sovereign, subject to occultation, devoid of power, fit for purification, fit for awakening. 6

This is the description of the meaning of [the word] *kevala*, 'isolated'. Consciousness which consists of knowledge and the quality of agent, is the power of the soul. It is eternal. In the immediate context only its form of knowledge is intended[36]. It is not fully manifested, because this soul is obstructed by *mala*. It does not apply to the objects[37]. Thus this soul is *acetana*, 'deprived of [fully manifested] consciousness'. It is *vibhu*, 'ubiquitous' according to the revelation about the manifestation of consciousness, because wherever there is a factor of manifestation, there will be a secondary manifestation of consciousness, as [a manifestation of consciousness] qualified by a particular state is revealed. And it is this state which will have an end [not the consciousness]. Therefore this soul is *nitya*, 'eternal'. And the eternal is not fit to have an end by the end of a state. The soul does not have that non-eternity which is the resorption of other non-eternal entities born from a material cause, into their material cause. *Guṇahīna* : devoid of the *guṇas* which are *kalā*, etc., auxiliaries of the soul in the realisation of experience. This soul does not

अकरणा या क्रिया सास्य निरुद्धक्रियाशक्तित्वान्नास्तीत्य**क्रियः** । **अप्रभुः** – प्रभुत्वं सकलकार-केशित्वमैश्वर्यं तदस्य संनिरुद्धमित्यप्रभुः । व्याघातः शिवात्तिरस्कारः । तिरोभावं भजत इति व्याघातभाक् । स्वयं मलं [९५]विदार्य नात्मीयं बलमर्थेषु प्रवर्तयितुं शक्नोतीत्य**शक्तः** । **शोध्यः** – एतस्यामवस्थायां शिवेन मलतोऽपि शोध्यः । **बोध्यश्चा**सौ मुकुलीकृतशक्तिजालः सन् प्रविकसितशक्तिजालः कार्यः ।

क एवं व्याख्यायते । अकलः पशुः । [९६]कलादिकलापरहितत्वादकलः । पशुत्वयोगात् पाश्यत्वाच्च पशुः । ये चैते विभुत्वादयोऽवस्थान्तरे दृष्टास्तेऽपि न दोषाय, यतो नैवं विवक्षितं येऽन्यस्यामवस्थायां धर्मा न सन्ति त एव [९७]वक्तव्या इति, किंतु य एव तस्यामवस्थायां धर्मास्त एव वक्तव्या इति ।

प्राक्प्रोक्तं स्वयंभुवा "...सुरेशानः...प्राह विस्तरशः पुनः" इति । तत्रैतदाशङ्क्यते । [९८]यदिदमात्मनोऽतिविस्तारव्याख्यानं तत्स्वकृतैः श्लोकैः स्वयंभूः करोतीति । तन्निवृत्त्यर्थं **पूर्वं मायात्मकाद्बन्धादि**त्यादि स्वकृतं श्लोकद्वयमाह ।

> [९९]पूर्वं मायात्मकाद्बन्धादित्थमात्मा स्थितो मया ।
> प्रोक्तो गुरुमुखोक्तेन श्लोकबन्धेन [१००]हे द्विजाः ॥
> भोक्ता भोजकभावेन [१०१]नानाभोगविसर्पिणा ।
> सांप्रतं प्रोच्यते [१०२]बद्धो बन्धेनात्मा कलादिना ॥ ७-८ ॥

तत्राद्यः श्लोकः स्पष्टः । द्वितीयस्तु व्याक्रियते । तत्र चार्थान्तरमस्ति । भोगक्रियां कर्तु-मर्हतीति भोक्ता । [१०३]मलयुक्तः कर्मोपगतः शिवेन च भोगाभिमुखीकृतो भोगक्रियां कर्तुमर्हतीति । एवंविधः सन्नात्मा **बद्धो बन्धेन** । केन भावेन । **भोजकभावेन** भोजकत्वेन । एतदेव कला-देर्बन्धत्वं यद्भोक्तारं भोजयति । किंविशिष्टेन । **नानाभोगविसर्पिणा** भोक्तारं नानाभोगेषु

have the type of action done without instrument[38], because her power of action is obstructed. Thus it is *akriya*, 'devoid of action'. The sovereign-ship which is power, i. e. the faculty of ruling all the factors of action, is obstructed [in this soul] which is thus *aprabhu*, 'non-sovereign'. *Vyāghāta* means an occultation coming from Śiva; this soul is subject to this occultation; thus it is *vyāghātabhāj*[39], 'subject to occultation'. This soul is not by itself able to apply its own power towards the objects, after having destroyed the *mala*; thus it is *aśakta*, 'devoid of power'. In that state this soul is *śodhya*, 'fit to be purified' from *mala* itself by Śiva. And it is *bodhya*, "fit for awakening" : having its set of powers closed, it must be made to have its set of powers open.

Who is thus described ? "Akalaḥ paśuḥ". It is *akala*, because it is non-united with the group of [*māyā*, products] *kalā*, etc. It is *paśu*, 'bound soul' because it has the nature of bound soul[40] and because it is bound[41]. And the properties of omnipresence, etc. which are seen in other states of the soul do not make [the present description] faulty, because the intention is not that only those properties which are not seen in the other states should be mentioned, but that only those which are seen in the present state should be mentioned.

Previously Svayaṃbhū has told : "... the Lord of gods ... enunciated it again in an extended form" (st. 4). In this connection there is a suspicion that Svayaṃbhū does this very extended exposition of the soul with stanzas composed by him. To remove this suspicion Svayaṃbhū enunciates two stanzas composed by himself : "pūrvaṃ māyātmakād bandhāt ..."[42].

The soul in the state it has before [its connection with] the bond consisting in māyā[43] has been told by me through a composition of a stanza uttered by my guru, o twice-borns. 7

Now I tell the soul, which is the agent fit for experience, which is bound by the bond consisting of *kalā*, etc. which bond, being such by its nature of inciter to experience, puts in motion towards many types of experiences. 8

The first of these two stanzas is clear. We comment the second one. A new object is presented here[44]. *Bhoktṛ* means 'able to perform the action of experience'[45] : the soul united with *mala*, connected to *karman* and turned by Śiva towards experience, is fit to perform the action of experience. Being such the soul is "baddho bandhena (bound by the bond of *kalā*, etc.)". [Bond] in what respect ? "Bhojakabhāvena" : as impeller to experience. That property itself to impel the agent to experience, makes *kalā*, etc. a bond. How is this bond qualified ? "Nānābhogavisarpiṇā" : which has the habit "visarpayitum" i.e. to put in motion the agent of experience towards many types of experiences to be

कर्तव्येषु विसर्पयितुं प्रवर्तयितुं शीलमस्येति । अनेन गुरुमुखोक्तेन ... सांप्रतं प्रोच्यते बद्धो बन्धेनात्मना कलादिना । इदमर्थान्तरम् – यादृश आत्मा येन भावेन यादृशेन बन्धेन बद्ध इति।

अत्यन्तमलिनस्येत्यादि नैधनेशं सूत्रम् –

[१०४]अत्यन्तमलिनस्यास्य [१०५]प्रागुक्तस्याविकारिणः ।
कला संश्लेषमायाति [१०६]शिवेच्छानुविधायिनी ।।९ ।।

निबिडमलावकुण्ठितस्या**स्य**[।]कलात्मनः । भवति हि बद्धात्मनोऽपि मलिनात्यन्तत्वम् । यतस्तस्य क्वचित्क्वचिच्चैतन्यप्रवृत्तिर्दृश्यते, [१०७]साप्यस्य नास्तीत्यत्यन्तमलिनः । [१०८]किमत्रैवा-चेतनादिसूत्रेऽत्यन्तमलिन[त्व]युक्तस्य । [१०९]न । **पागुक्तस्य** पूर्वसूत्रेऽविमलः केवल इत्यनेनोक्तस्य । [११०]कथ[म]विमलमुक्तम् । केवलत्वात्तत्प्रोत्सारिकाः कला न [१११]सन्तीत्यतो गम्यते **अत्यन्तमलिन** इति ।

अवस्थान्तरप्राप्तिमतः क्षीरादेर्विकारः परिणामो दृष्टः, [११२]आत्मनोऽप्यवस्थान्तरप्राप्तिम-त्वाद्विकारः प्रसक्त इत्यत आह – **अविकारिण** इति । अवस्थान्तरप्राप्तिमत्त्वेऽप्यात्मनो न विकार इति । अवस्थितस्य धर्मिणः [११३]पूर्वद्रव्यत्वनिवृत्तौ द्रव्यान्तरत्वेन व्यवस्थानं विकारः । आत्मनस्तु [११४]मलावकुण्ठितबलस्य मलप्रोत्सारिणा तस्य बलप्रकटत्वमवस्थान्तरप्राप्तिः, अतो न विकारः । न हि घटस्य पटावकुण्ठितस्वरूपस्य पटप्रोत्सारिणा [११५]स्वरूपप्रकटत्वं विकार इति ।

एवमस्याकलात्मनोऽत्यन्तमलिनस्य [११६]मलप्रोत्सारणाय प्रथमतः **कला संश्लेषमा-याति** । सा चाचेतनत्वान्न स्वतन्त्रा, किंतु **शिवेच्छानुविधायिनी** । तदनन्तरं शिवेच्छानुविधायिन एव विद्यादयः [११७]संश्लेषमाया[न्]तीति ।

कलादीनां [११८]येन यस्याङ्गस्योपकृतौ यैश्च भोगान्निष्पाद्यात्मा भुङ्क्ते, तत्सर्वमाह – [११९]**कलोद्बलितचैतन्य** इत्यादि ।

[१२०]कलोद्बलितचैतन्यो विद्यादर्शितगोचरः ।
रागेण रञ्जितश्चापि [१२१]बुद्ध्यादिकरणैस्ततः ।।१०।।

accomplished. The soul bound by this bond of *kalā*, etc. is now told [by me through a composition of stanzas] told by the guru. This is a new object : a type of soul bound by a bond of such kind, binding in virtue of such property.

"Atyantamalinasya ..." is a saying of Nidhaneśa.

The essence *kalā*, following Śiva's will, comes and sticks to this afore-mentioned, unchangeable [soul], intensely affected by *mala*. 9

"Asya" means : for this *akala* soul, made inactive by dense *mala*. For the bound soul also there is intensity of its connection with mala. [But] because for that [bound soul] one sees the application of consciousness to some objects here and there, whereas such application does not occur for this [*akala* one], [this one is more] intensely united to *mala*. [Does "asya"refers to the soul] intensely connected to *mala*, mentioned only in this saying "acetanaḥ..." (st. 6)? No, "prāguktasya" : it refers to the soul mentioned in the anterior saying "avimalaḥ ... kevalaḥ" (st. 5). How is it told to be non-devoid of *mala* [for that soul] ? Because it is isolated [from *māyā*] there are no *kalā*, etc. which dispel the *mala*; therefore it is understood as intensely affected by *mala*.

[One could object :] everyone sees that milk, etc. which takes different states is subject to alteration, i. e. transformation; it follows that the soul also may be subject to transformation, since it takes different states. Therefore [Nidhaneśa] says "avikāriṇaḥ" : even though the soul takes different states, it is not subject to transformation. A transformation is the establishment of an individual which had a first state, as a new individual, its previous individuality being lost. But the soul whose power is made inactive by *mala*, takes a different state which is the manifestation of its power through a factor eliminating *mala*; therefore there is no transformation of it. For a pot the form of which is covered by a cloth, the manifestation of its form by some factor which removes the cloth, is not a transformation.

Thus, in order to remove the *mala* of this *akala* soul intensely bound by *mala*, firstly the essence *kalā* comes and sticks to it. And this *kalā* is not independent, because it is deprived of consciousness, but it follows Śiva's will. Afterwards the [essences (*tattva*)] *vidyā*, etc. following Śiva's will come and stick to the soul.

The soul makes experiences, accomplishing them by means of some of the essences, *kalā*, etc., a main one being helped by [subsidiary] others. [Nidhaneśa] says all that : "kalodbalitacaitanyaḥ ...".

Having its consciousness fortified by *kalā*, having a field of objects shown to itself by *vidyā*, being impelled to desire by *rāga*, by means of *buddhi*, etc....[46]. 10

कलया कर्तृभूतयोद्धलितं समर्थितमभिव्यञ्जितं चैतन्यं यस्येति । कर्तृत्वमात्रं कला व्यनक्ति, ज्ञानरूपं तु विद्यादयः । तस्य विद्यैव [१२२]व्यञ्जिका यतस्तस्याः कर्मणि व्यापारादनन्तरं तद्भवति । इतरस्तु तत्त्वग्रामः । कर्तृकर्मणोस्तूपकारकत्वात्तस्य व्यञ्जक उच्यते । तच्च द्विरूपं प्रमाणरूपं फलरूपं च । यदानेन गोचरमालोचयति तदा प्रमाणम् । यदा कारकव्यापारेणावसानिकं निष्पादितम् तदा तत्फलम् । अनन्तरमेव प्रमाणरूपमुच्यते । भोगोऽस्य वेदनेत्यत्र फलं वक्ष्यतीति ।

एवं [१२३]कलासंसर्गाद्व्यक्तकर्तृत्वोऽपि नादृष्टे विषये प्रवर्तते, गोचरदर्शनं च न [१२४]करणं विनेत्यत आह **विद्यादर्शितगोचर** इति सूत्रग्रन्थः । [१२५]विद्यया दर्शित उपलम्भितो गोचरोऽस्येति । विद्या गोचरं दर्शयतीति पुंसः करणत्वं प्रतिपद्यते । गोचरश्चात्र साक्षात्पुरुषस्य शब्दाद्यनुरञ्जितसुखदुःखमोहरूपा बुद्धेर्वृत्तिः, पारम्पर्येण शब्दादय इति ।

[१२६]एवमुपलब्धगोचरोऽपि सक्त्यभावान्न प्रवर्तत इत्यत आह **रागेण रञ्जितः** [इति] । रागेण [१२७]जनितसक्तिर्दुःखमोहोत्कटमपि भोग्यं सुखत्वेन प्रतिपद्यते तदुपादानाय प्रवर्तते नेतरथा ।

एवमेतेन तत्त्वत्रयेण [१२८]जनितप्रवृत्तिः पुमान्ततो **बुद्ध्यादिभिः करणै**र्भोग्यतां निष्पादयति । अत्र च प्रधानस्य गुणानां तन्मात्राणां भूतानां [१२९]चाग्रहणं प्रवृत्त्यङ्गत्वात् । तानि हि बुद्ध्याद्युपकरणानि न [१३०]साक्षात्प्रवृत्त्यङ्गानीति । तत्र प्रधानस्य गुणानां च पूरकत्वात् तन्मात्राणां भूतानां त्वधिष्ठेयत्वेनेति । कालनियत्योश्च [१३१]प्रवृत्तप्रयोजकत्वादत्राग्रहणम् । कालो हि प्रवृत्तमेव पुरुषं त्रुटयादिभिः कलयति । नियतिरपि प्रवृत्तमेव यत्र कर्मफलं तत्र नियमयतीति ।

एवमार्जितभोग्यं **मायाद्यवनिपर्यन्ते**त्यादि ।

["Kalodbalitacaitanyaḥ" :] the soul whose consciousness is *udbalita* i. e. made able, manifested, by *kalā* which is the agent [of the manifestation]. *Kalā* manifests only the power of agent [in the soul], whereas *vidyā*, etc. manifest the power of knowledge. *Vidyā* itself is a factor of manifestation of that [power of agent], because that manifestation occurs after the activity of *vidyā* regarding the object of the action[47]. There exists another group of essences, which is told to be a factor of manifestation of the same power of agent, because it helps the agent and the action. And this group has two forms, means of knowledge and fruit. When through it [the soul] sees a field of objects, it is a means of knowledge. When through the activity of the factors of action something final is accomplished, it is a fruit. Its form of means of knowledge will be told immediately (st. 10-11); its form of fruit will be told in "bhogo'sya vedanā" (st. 12).

[One could object :] even though its power of agent is manifested by its association with *kalā*, the soul does not enter in activity with regard to an object it has not seen; and there is no seeing of the object without an instrument. Therefore a passage of the *sūtra* says : "vidyādarśitagocaraḥ" : to whom there is a field of objects which is *darśita*, i. e. caused by *vidyā* to be perceived. *Vidyā* shows the field of objects; thus it has the position of an instrument for the soul. And for the soul the field of objects is, on one side, directly, a transformation of the psychism in the form of pleasure, pain, delusion, coloured by sound, etc., on another side, indirectly, sounds, etc.

[One could object :] even though the soul has perceived its field of objects, it does not enter into activity, because it has no attachment. Therefore [the *sūtra*] says "rāgeṇa rañjitaḥ (being impelled to desire by *rāga*)". When *rāga* has produced attachment in the soul, not otherwise, the soul takes as pleasure even an object of experience which overflows with pain and delusion, and strives to take possession of it.

The soul which has been thus set into activity by these three essences, produces the position of object of experience [for its field of objects] through instruments which are *buddhi*, etc. [In "buddhyādi-"] *pradhāna, guṇas, tanmātras* and elements are not mentioned, because [the entities understood] here are the auxiliaries of the setting into activity [of the soul]; and these *pradhāna*, etc. are auxiliaries of the *buddhi*, etc.; they are not direct auxiliaries of the setting into activity [of the soul], since the *pradhāna* and the *guṇas* are factors of completion with regard to the *buddhi*, etc., whereas *tanmātras* and elements are their (*buddhi's*, etc.) location. Moreover time and fate are not mentioned here, because they act as impellers [of the soul] which is already set into activity. Time impels the soul already set into activity through instants, etc. Fate also controls the soul already set into activity [to go] where is the fruit of its actions.

[The author describes the soul] which has thus acquired an object of experience : "māyādyavaniparyanta-...".

[१३२]मायाद्यवनिपर्यन्ततत्त्वभूतात्मवर्त्मनि ।
भुङ्क्ते तत्र [१३३]स्थितो भोगान्भोगैकरसिकः पुमान् ।। ११ ।।

मायादिकेऽवनिपर्यन्ततत्त्वभूतात्मवर्त्मनि। तत्त्ववर्त्म चात्र [१३४]भुवनत्वेन व्यवस्थितं परिगृह्यते । भूतानां भुवनजातानां शरीराणां वर्त्म । आत्मग्रहणेनात्रात्मनः साक्षादुपकारकत्वाद्भावप्रत्ययसंतानं वर्त्म परिगृह्यते । तत्र च भुवनभूतभावाख्ये त्रिविधे वर्त्मनि भोग्यभोक्तृत्वेन स्थितो भोगं भुङ्क्त आसादयति [१३५]प्राप्नोति । अयं चेश्वरेण बलाद्भोगे नियुक्तः । तेनानिच्छन्नपि कदाचिद्द भुङ्क्त इति प्राप्ते सति, उच्यते **भोगैकरसिक** [इति] [१३६]भोगेष्वेकैकेषु रसिको निष्ठाभिलाषोऽस्येति । एतदुक्तं भवति -

"तमिच्छन्भुङ्क्ते यतो मलीमसमपि भोगं भुञ्जानो न विरज्यते" इति ।

अनेन [१३७]च रागस्य भोगकालेऽपि व्यापारोऽस्तीति ज्ञापयति । विद्यायाश्च [१३८]करणत्वाद्भोगनिष्पत्तौ व्यापारो लब्ध एव, यतो कर्तुः करणं विना न कर्मणि क्रिया दृष्टा । न चान्यस्याः करणत्वं [१३९]गोचरदर्शन उक्तम् ।

को भोगः कुतश्चेति । **भोगोऽस्य वेदने**त्यादि ।

[१४०]भोगोऽस्य वेदना पुंसः सुखदुःखादिलक्षणा ।
[१४१]तां समर्थितचैतन्यः पुमानभ्येति कर्मतः ।।१२।।

वेदना संवित्तिरनुभवः । [१४२]सुखदुःखादिभिर्विषयैरुपरक्तत्वात्तैरेव लक्ष्यते विशिष्यते, सुखा वेदना दुःखा वेदना मूढा वेदनेति । तां च प्रवृत्तिवत्कलासमर्थितचैतन्यः [१४३]कलयावियुक्त एव **पुमानभ्येति** [१४४]प्राप्नोति कर्मत आलम्बनात् । सुखदुःखमोहभावेन परिणतं कर्म पुंसां वेदनाया आलम्बनं भवतीति ।

कर्मतश्च शरीराणीत्यादि ।

Standing on the road which starts with *māyā*, i. e. the road of worlds upto earth, of material bodies and of subtle bodies, the soul, enjoying only experience, experiences objects. 11

[The compound *māyādyavaniparyantatattvabhūtātmavartmani* is to be analysed as] : *māyādike 'vaniparyantatattvabhūtātmavartmani* (on the road which starts with *māyā*, [road] of worlds upto earth, of material bodies and of subtle bodies)[48]. And here is mentioned a path of *tattvas* established as being the worlds. Then is mentioned a path of *bhūtas*, i. e. of the bodies which are born in these worlds. The word *ātman* denotes here the knowledges and dispositions of the *buddhi*, because they help the soul[49]. And, being placed as agent of experience of objects on this threefold path called path of worlds, bodies and dispositions, [the soul] "bhuṅkte" i. e. goes to, reaches [the object of experience]. And [one could say that] this soul is appointed to experience by force by the Lord; thus even unwillingly it experiences from time to time. As this [interpretation] may occur, [in order to prevent it, the *sūtra*] says : "bhogaikarasikaḥ" : the soul which is *rasika* i. e. which has a desire to devote itself to each object of experience. It has been told : "Willingly the soul experiences the object, because when it experiences even a stained object, it has no disgust". Thus [the *sūtra*] reveals that *rāga* is active at the time of experience also. And because it is an instrument, we obtain that *vidyā* works for the accomplishment of the experience, since an action of an agent with regard to an object is never seen to occur without an instrument. And it has been told that there is no other instrument for the presentation of the field of objects.

What is experience and from what is it derived ? [The answer is given in :] "bhogo 'sya vedanā...".

Experience is a sensation, by this soul, qualified by pleasure, pain, etc. When its consciousness has been empowered, the soul gets that [sensation] in conformity with its *karman*. 12

Vedanā is sensation, direct knowledge. Because it is coloured by objects such as pleasure, pain, etc., "lakṣyate" i. e. it is qualified by them : 'a pleasant sensation, a painful sensation, a deluded sensation'. And the soul, the consciousness of which is empowered by *kalā*, i. e. is non-separated from *kalā*, "abhyeti" i. e. arrives at this [sensation] as it arrives to activity, in conformity with its *karman* which is the support. The *karman* which has evoluted in the form of pleasure, pain or delusion is the support of this sensation.

"Karmataś ca śarīrāṇi...".

And in conformity with the *karman*, bodies, objects of senses,

[145]कर्मतश्च शरीराणि विषयाः करणानि च ।
भोगसंसिद्धये भोक्तुर्भवन्ति न भवन्ति च ॥ १३ ॥

[146]शरीरादीनां यावपि भावा[भा]वौ भोगस्य निमित्तभूतौ तावपि कर्मतो निमित्तादिति । सर्वथा यत्किंचिद्भोगनिमित्तं तत्सर्वं [147]कर्मत इति । तत्रोदाहरणम्, [148]पुत्रान्नादिभावः सुखभोगनिमित्तम्, अहिकण्टकादिभावो दुःखभोगनिमित्तमिति पुत्रान्नाद्यभावो [149]दुःखमोहभोग-निमित्तम्, अहिकण्टकाद्यभावः सुखभोगनिमित्तम् ।

बद्धात्मनः परां काष्ठामाह - **एवं मायाञ्जनस्थ** इत्यादि ।

एवं [150]मायाञ्जनस्थोऽणुर्निजदोषतिरस्कृतः ।
याति [151]तन्मयतां तेषु मायाभोगेषु रञ्जितः ॥ १४ ॥

एवम् उक्तेन क्रमेण कलया [152]कर्तृरूपया प्र[वर्तितो विद्यया विवेच्य] बुद्ध्यादिभिरुप-संस्कृतः । मायाञ्जनानि मायायाः कार्याणि । यानि भोग्यानि तान्यत्र [153]परिगृह्यन्ते । तानि चातिरमणीयमात्मानं [आसा]द्यातिसंसर्गाद्विशुद्धस्फटिकप्रख्यमणेरुपाधानप्रख्यान्यन्यच्छायं तमञ्ज-यन्ति [154]स्वनि[र्भा]सं कुर्वन्तीत्यञ्जनानि । [155]तेषु स्थितोऽणुरतिरमणीयबुद्ध्या परत्वबुद्ध्या च । निजेन च दोषेण मलेन [156]**तिरस्कृतोऽ**धो नियामितः, नोर्ध्वं शिवादिकं पश्यतीति । तैश्च मायात्मकैर्भोगक्रियाविषयै **रञ्जितः** सक्त एव । मायाभोगेषु **तन्मयतां याति,** [157]तदव्यतिरिक्तमात्मानं मन्य[ते] तदुपकारेणानुगृहीतस्तदुपघातेन चाहं हत इति ।

संसारीत्यादि ।

[158]संसारी विषयी भोक्ता क्षेत्री क्षेत्रज्ञ एव च ।
[159]शरीरी चेति बद्धात्मा सकलश्चोच्यते बुधैः ॥ १५ ॥

बद्धात्मनः पर्यायनामानि । संसरति शरीराद्यादानेनेति [160]संसारी । विषयोऽस्य भोग्यत्वेन विद्यत इति विषयी । भोगं भुङ्क्त इति भोक्ता । क्षेत्रमस्य स्वशक्तिव्यक्तिकृन्मनोऽधिकरणमस्तीति

instruments [of knowledge and action] exist or do not exist for the experiencing soul for the realisation of its experiences. 13

The existence and inexistence of bodies, etc. which are the cause of experience, are themselves derived from *karman* as their circumstantial cause. Whatever is in some way cause of experience, all that derives from *karman*. For example the existence of a son, of food, etc. is the cause of an experience of pleasure, the existence of serpents, of thorns, etc. is the cause of an experience of pain; the inexistence of a son, of food, etc. is the cause of experience of pain and mental aberration, the inexistence of serpents, thorns, etc. is the cause of an experience of pleasure.

The text says the highest degree of bondage of the soul : "evaṃ māyāñjanasthaḥ...".

Thus [equipped] the soul, placed in the midst of *māyā* products, covered by its own *mala*, attached to experiences of *māyā*, becomes fused with that *māyā*. 14

"Evam (thus)" i. e. set into activity by *kalā* as agent and equipped with *buddhi*, etc. being made to discriminate [the objects] by *vidyā*, in the manner which has been told above. *Māyāñjana* means the products of *māyā*. Those which are fit for experience are mentioned here. And these [products of *māyā*, having approached] the very beautiful soul, equal to the things deposited close to a precious stone such as pure crystal [and which give their colour to it], by their narrow contact ... "añjayanti" tint it with another colour, i. e. give it their own appearance; thus they are *añjana*,"factors of coloration". The soul stands on those [*māyā* products] with the thought of being very beautiful and superior. Because of its own *doṣa*, i. e. its own *mala*, it is *tiraskṛta*, i. e. constrained to look downwards; it does not look upwards towards Siva, etc. It is *rañjita*, i. e. attached to these *māyā* products, objects of experience and action. In these experiences of *māyā* "yāti tanmayatām" i. e. it thinks itself as non-different from it : "I am favoured with its help, I am struck by its blows".

The bound soul is called by the knowers : transmigrating entity, possessor of an objective domain, experiencer, possessor of a field, knower of a field, possessor of a body, united with *kalā*. 15

Transmigrating entity, etc. are alternative names of the bound soul. *Saṃsarati*,'it transmigrates' by taking bodies, etc.; therefore it is *saṃsārin* (transmigrating entity). It has a *viṣaya*,'objective domain' as object of experience; therefore it is *viṣayin* (possessor of an objective domain). *Bhogaṃ bhuṅkte*,'it experiences'; therefore it is *bhoktṛ* (experiencer). It has a *kṣetra*, 'field' i. e. a location, the mind which manifests its [the soul's] power;

[161]क्षेत्री । क्षेत्रं पाशजालं भोग्यत्वेनावस्थितं जानातीति क्षेत्रज्ञः । शरीरमस्य भोगायतनत्वेनास्तीति शरीरी । [162]कलादिभिः सह वर्तत इति सकल इति ।

[163]एवं बद्धात्मा व्याख्यातः । इदानीं मुक्तात्मा व्याक्रियते । स केन क्रमेण मुच्यत इति । **शिवेच्छये**त्यादि ।

शिवेच्छया [164]पुरानन्ता शैवी शैवार्थदायिका ।
सा [165]शक्तिरापतत्याद्या पुंसो जन्मन्यपश्चिमे ॥ १६ ॥

शिवस्येच्छया प्रयुक्ता [166]शक्तिरापतति । शिवेच्छै[व शक्तिरिति] तत्कथमेतदिति । नाव्यतिरेकेऽपि दोषाय, यतः [167]पूर्वं शिवस्येच्छाख्यशक्तेर्व्यापारः – अस्य [168]पुंसोऽनुग्रहं करोमीति, अनन्तरं च [169]शक्तिरापतत्येतमर्थमभिप्रेत्योक्तम् - **शिवेच्छया शक्तिरापततीति । पुरा** पूर्वं दीक्षातः । [170]**अनन्ता**परिमितत्वाज् जन्मप्रलयलक्षणेन चान्तद्वयेन रहितत्वादनन्तवृत्तित्वाच्च । [171]शिवेच्छया प्रयुज्यमानत्वादाणवी पाशात्मिका [172]चान्या मा भविष्यतीति शैवीत्युक्ता । शिवस्य स्वात्मनि वर्तत इति । तिरोभावशक्तिरप्येवंविधेति । **शैवार्थ-दायिका**, शैवार्थः [173]सर्वज्ञतादिको गु[णः]...[तम]र्थं ददातीति तत्तुल्यमभिव्यनक्तीति । शैवार्थः [174]पशुपाशमन्त्रमन्त्रेश्वरलक्षणः शिवस्य परिग्रहे वर्तत इति तं ददाति [175][तस्याधिपतित्वं करोतीति] । **सा शक्तिरापतति** आगच्छति । [176]**आद्या** प्रधानभूता कारणभूता दीक्षायाः । यमसावापततीति तस्यावश्यं [177]दीक्षा भवतीति । कमसावापतति । **पुंसः** पुमांसमापतति यावत् । पुंसा सह संबध्यत इति यावत् । कदा । **पुंसो जन्मन्यपश्चिमे** [178]आवसानि[के] जन्मनि । मलशक्तिरीश्वरशक्तितिरस्कृताधिकारा समाप्यते । तदपश्चिमं जन्मेति । न तस्माज्जन्मनो ऽन्यजन्मास्तीति ।

[179]तन्निपातादित्यादि ।

[180]तन्निपातात्क्षरत्यस्य मलं संसारकारणम् ।
क्षीणे [181]तस्मिन्नियियासा स्यात्परं निःश्रेयसं प्रति ॥ १७ ॥

तस्याः [182]शक्तेर्निपातादनुग्राह्यानुग्राहकलक्षणसंश्लेषात् । **क्षरत्यस्य मलम्** । तत्र

therefore it is *kṣetrin* (possessor of a field). *Jānāti kṣetram,* 'it knows a field' i. e. the group of bonds established as object of experience; therefore it is *kṣetrajña* (knower of a field). It has a *śarīra,* 'body' as a dwelling place for experience; therefore it is *śarīrin* (possessor of a body). It is accompanied by *kalā*, etc.; therefore it is *sakala* (united with *kalā*).

Thus the bound soul has been described. Now the liberated soul is explained. By which process is it liberated ?

By Śiva's desire, before [*dīkṣā*], the infinite prime *śakti* which resides in Śiva and gives śiva-ness, comes to the soul in its last birth. 16

Impelled by Śiva's desire his *śakti* comes. Now *śakti* is Śiva's desire itself. Therefore how is that told ? Even if there is non-difference of these two, there is no defect, because the author says "by Śiva's desire *śakti* comes" having in mind that firstly there is the action of Śiva's *śakti* called desire : "I give grace to this soul"; subsequently *śakti* comes [to that soul]. "Purā" i. e. before *dīkṣā*. "Anantā (infinite)" : because she is not limited, as she has none of the two extremities which are characterised as birth and death, and because her activity is infinite. Because she is impelled by Śiva's desire, so that she will not be taken as a different entity residing in the soul and having the nature of a bond, she is told to be "śaivī" i. e. residing in the proper self of Śiva. [One could object that] even the *śakti* of obscuration is of that sort; [therefore the text says :] "śaivārthadāyikā" : which gives *śaivārtha*, i. e. the qualities, omniscience, etc. [which are in Śiva]; it amounts to say : which manifests [qualities] equal to those of Śiva [in the souls]. [Or the meaning is :] which gives *śaivārtha*, i. e. that which consists in souls, bonds, Mantras, Lords of Mantras, and which is in the environment of Śiva; it amounts to say : which gives [to the soul] lordship over that[50]. This *śakti* "āpatati" i. e. comes. "Ādyā" i. e. which is principal, which is the cause of *dīkṣā*. One to whom this *śakti* comes, to him necessarily there is *dīkṣā*. To whom does the *śakti* come ? "Puṃsaḥ" i. e. it comes to the soul; it amounts to say : it is related with the soul. When [does it come] ? "Puṃso janmany apaścime" i. e. in the last birth. *Mala's* power has its function obscured by Śiva's *śakti* and goes to its end. That is the last birth. There is no other birth than this one.

"Tannipātat...".

By the advent of this *śakti* the *mala* of that [soul], cause of transmigration, flows away. When it has disappeared, there may be a desire to go towards the supreme, highest good. 17

'Nipātāt' (by the advent) of this *śakti* [means :] by the relation of object of grace to bestower of grace. "Kṣaraty asya malam" : firstly *mala* does not flow away by itself, nor

तावत्स्वयं [१८३]क्षरति, [१८४][न] बन्धनं स्वयं बन्धकत्वं विमुञ्चति, [नाप्य]णुस्तस्य क्षरणे कारणं तस्मात्तत्सकाशात्तस्य दुर्बलत्वात् । दौर्बल्यं च तेनैव [१८५]संनिरुद्धशक्तित्वात् । ताभ्यां च बलीयसी शिवशक्तिः । अतस्तन्निपातात्क्षरत्यधो [१८६]य[ा]त्यस्य पुंसो मलमिति । तच्च क्षरणं तदौन्मुख्यलक्षणात् कार्यतोऽधिगम्यते, यतस्तस्य प्राङ् मलेन [१८७]संनिरुद्धशक्तेर्न दृष्टमिति । अस्मात्क्षरणं मलस्याधोनियामकत्वमात्रमेव, [१८८]यतो विशेषयति - **संसारकारणम्** इति । यतः संसारकारणम्, मलं क्षरतीति । एतदुक्तं भवति – मलस्य [१८९]संसारकारणत्वमधोनियामकत्वं निवर्तत इति दीक्षायाः सार्थकत्वम् । यदि चात्र मलस्य सर्वात्मना क्षरणमिष्यते, ततो दीक्षाया आनर्थक्यं प्रसज्येतेति । **क्षीणे तस्मिन्मले यियासा** यातुमिच्छा **स्यात्** । **परं निःश्रेयसं प्रति** [१९०]निःश्रेयसभागयं पुमान् । तानि चास्य तारतम्ययोगभावेन स्थितानि । परं च निरतिशयनिःश्रेयसमनेन यातव्यम् । तत्कदाहं यास्यामि, तत्प्राप्त्यै को वा उपायो भवेद्येन तदाहं [१९१]यास्यामीत्येवंविधा सा यियासा स्यादिति ।

स देशिकमनुप्राप्येत्यादि ।

[१९२]स देशिकमनुप्राप्य दीक्षाविच्छिन्नबन्धनः ।
प्रयाति शिवसायुज्यं निर्मलो [१९३]निरनुप्लवः ॥ १८ ॥

स यियासावान् शिवेच्छयाधिकृतमेव **देशिकं** प्राप्नोति । तम् **अनुप्राप्य** तस्माद्दीक्षामासादयति । दीक्षया विच्छिन्नाशेषबन्धनः सन् **प्रयाति** प्राप्नोति **शिवसायुज्यं** शिवेन सहयुग्भावं [१९४]तुल्यत्वम् । विच्छिन्नबन्धन इत्यस्य व्याख्यानं निर्मलो [१९५]निरनुप्लव इति । अनु संतानेन प्लवनं विषयसातत्यगमनमनुप्लवः । स [१९६]यस्माद्येषु कलादिषु सत्सु विषयेषु च भवति तैः सह निर्धूतो व्यावर्तत इति । यद्वा सायुज्यं गतः किंरूप इति । निर्मलो निरनुप्लव इति । यदवस्थाद्वये प्रागुक्ते धर्मद्वयं दृष्टम्, तदस्य शिवसायुज्यं गतस्य नास्तीति ।

शिवसायुज्यं गतो जन्म [१९७]नाप्नोतीति । **अनेन क्रमयोगेने**त्यादि ।

अनेन क्रमयोगेन परां [१९८]केवलतां गतः ।
[१९९]अनाद्यशुद्धिशून्यत्वात्प्राप्नोति न भवान्तरम् ॥ १९ ॥

does the bond give away its binding agency by itself. Then the soul is not the cause of *mala's* flowing away, because it is weaker compared to *mala*. And the soul is weak, since its *śakti* is obstructed by this very *mala*. Siva's *śakti* is stronger than those two. Therefore by the advent of Siva's *śakti* the *mala* "asya" i. e. of the soul "kṣarati" i. e. goes down. And this flowing away is understood from its effect which is the action of the soul to turn itself towards [the supreme good], because that was not seen before, since the soul had its power obstructed by *mala*. The flowing away bears only upon *mala's* action to lead [the soul] downwards, because it is qualified by "saṃsārakāraṇam" : *mala* flows away as cause of transmigration. This is what has been told : "the property of *mala* to be a cause of transmigration, its action to lead [the soul] downwards comes to an end". Thus the *dīkṣā* is purposeful. If a flowing away of the *mala* in its entire nature is accepted, there follows uselessness of *dīkṣā*. Once this *mala* has decreased there may be "yiyāsā" i. e. a desire to go. "Paraṃ niḥśreyasaṃ prati (towards the supreme, highest good)" : the soul enjoys [different types of] highest good; these [types] are placed in a hierarchy; and the "param" i. e. the highest good without superior is the goal of that soul. The desire to go may be of this form : "when will I go to this [supreme good], what can be the means to obtain it, the means through which I will go towards it ?"

"Saḥ deśikam anuprāpya...".

This soul, having approached a preceptor, having its bonds cut by *dīkṣā*, obtains equality with Siva; it is without *mala*, without trailing behind [objects]. 18

"Saḥ" i. e. the soul which has the desire to go, approaches a preceptor who has been put in charge by Siva's desire. Having approached him it obtains *dīkṣā* from him. Having all its bonds cut by *dīkṣā* "prayāti" i. e. it reaches "śivasāyujyam",the state of being united with, i. e. equality with Siva. "Nirmalo niranuplavaḥ", is a commentary of "vicchinnabandhanaḥ". *Anuplava* means *plavana,*"going",*anu,*"in the trail of" i. e. going in the trail of external objects. [*Niranuplava* means :] the soul from which, when *kalā*, etc. and the objects are present, [this trailing behind] is wiped off together with them, i. e. is eliminated. Or what form has the soul which has reached equality with Siva ? [To this question the answer is :] "nirmalo niranuplavaḥ" : the two properties seen in the two states mentioned before, do not exist for one who has reached equality with Siva.

One who has reached equality with Siva does not take birth. "Anena kramayogena...".

The soul which by this process has gone to the superior liberation, because it is devoid of the beginningless *mala*, does not obtain any new existence. 19

क्रमेण योगः क्रमयोगः पूर्वं शक्त्या सह योगः, ततो मलक्षरणेन योगः, ततो यियासया, ततो देशिकेन, [२००]ततो दीक्षया, ततो विच्छिन्नबन्धनत्वेन । एवम् **अनेन क्रमयोगेन परां केवलतां गतो** भवति । केवलस्य भावः केवलता, एकाकिता । नासौ परा, यतस्तस्यामपि [२०१]तस्य...द्वितीयोऽस्ति । [२०२]शिवसायुज्यलक्षणा तु परा केवलता, यतस्तस्यां न किंचिदपि द्वितीयमस्ति । तां गतः प्राप्तः सन् । अनादिमत्यशुद्धिर्मलस्तच्छून्यत्वात् । **प्राप्नोति न** [२०३]**भवान्तरम्** । न हि कारणं विना कार्यमुत्पद्यते । सत्यपि [२०४]कर्मणि पुनर्भवबीजमशुद्धि-र्मलः । तच्छून्यत्वात्कुतो भवान्तरप्राप्तिरिति । आदिमत्यशुद्धिः पञ्चपर्वादिविपर्ययः, तच्छून्यस्य केवलस्य दृष्टा भवान्तरप्राप्तिरिति तन्निषेधायानादिमद्ग्रहणमिति ।

आत्मव्याख्यानोपसंहाराय मलादिव्याख्यानोपक्रमाय च – **इत्थमात्मे**त्यादि ।

इत्थमात्मा [२०५]समाख्यातः सर्वावस्थास्ववस्थितः ।
साम्प्रतं प्रोच्यते ब्रह्मन् [२०६]पाशजालमनन्तकम् ॥ २० ॥

इति स्वायम्भुवसूत्रसंग्रहे [२०७]पशुविचारपटलः प्रथमः ॥

आगन्तुकानां पाशानामानन्त्यात्तत्समुदायापेक्षया [२०८]मलादीनां पाशानां संघातो **जालम-नन्तकम्** । यदा तु पाशा एव पुंस्त्वावरणत्वाज्जालमिव जालम् [२०९]तच्चान[न्त]कमिति, तदा तु प्रत्येकमनन्तत्वं व्याख्यातव्यम् । तत्र [२१०]तावन्मलस्यापरिमितत्वादनन्तकम् । अपरिमितत्वं चाण्वानन्त्यव्यापकत्वादनन्तशक्तित्वाच्च । पुरुषगुणनिरोधिकाः [२११]शक्तयस्तस्य विद्यन्ते । ताश्च प्रतिपुरुषवर्तिन्यः । पुरुषाणामानन्त्यात् [२१२]ता अप्यनन्ता भवन्ति । मायातत्त्वमप्येवम-परिमितत्वादनन्तकम् । अपरिमितत्वं च विकारानन्त्यव्यापकत्वात् [२१३]किंचानन्तशक्तित्वाच्च । विकारोत्पत्तिशक्तयस्तस्मिन् वर्तन्ते । विकाराणामानन्त्यात्ता अप्यनन्ता इति । [२१४]मायेयान्यपि तत्त्वभावभुवनरूपाणि प्रतिपुरुषवर्तीन्यनियतत्वादनन्तकानि । भुवनरूपाण्यपि प्रतिस्रोतोवर्तीनि, स्रोतसां चानन्त्यादनन्तकानि । कर्माण्यपि प्रतिपुरुषवर्तीन्यनियतत्वादनन्तकानि किं [२१५]चानन्तव्यक्तित्वाच्चेति ॥

इति स्वायम्भुवसूत्रसंग्रहे प्रथमस्य [पटलस्य] सद्योज्योतिष्कृता टीका समाप्ता ॥[२१६]

Kramayoga means a union with a succession [of events] : firstly there is union with Siva's *śakti*, then union with the flowing away of the *mala*, then with the desire to go, then with the preceptor, then with *dīkṣā*, then with the state in which the bonds are severed. Thus by undergoing this succession [of events, a soul] has gone "parāṃ kevalatām (to the superior liberation)" : *kevalatā* means the nature of the isolated one, i. e. isolation. This isolation is not superior, because even in this state there is a second ... But the isolation which is characterised by equality with Siva is superior, because in this state nothing is second. "Gataḥ" : having reached. ["Anādyaśuddhiśūnyatvāt" means :] because it is devoid of the impurity which has no beginning, i. e. the *mala*, "prāpnoti na bhavāntaram (the soul does not go to another existence)". An effect is not produced without a cause. Even if there is *karman* the seed of a new existence is the impurity or *mala*. Since [the liberated soul] is devoid of this [seed], how will it go to another existence ? There is an impurity which has a beginning; it is the illusion of five sorts,[51] etc.; now it is seen that there is obtention of a new existence for a soul which is devoid of this [illusion]. Therefore the mention of the word "anādi- (without beginning)" is done to eliminate it.

To give a conclusion to the description of the soul and to introduce the description of *mala*, etc. [the text says :] " ittham ātmā...".

Thus the soul has been described, placed in all its states. Now the endless group of bonds is told, O Brahman. 20

Because of the infinity of the adventitious bonds, with reference to the mass of these bonds, the group of the bonds, *mala*, etc. is an infinite *jāla*,'group'. But when each of the bonds themselves is said to be like a *jāla*,'net', because it covers the nature of the soul, — and that net is infinite —, then the infiniteness must be described for each bond. Firstly it is infinite because the *mala* is unmeasurable. And it is unmeasurable, because it pervades the infinite number of souls and it has an infinite number of powers (*śakti*). *Mala* has powers which obstruct the qualities of the souls. And these powers are situated in all the souls, one in each. Because of the infinite number of the souls, they are also infinite. In the same way the essence māyā is infinite, because it is unmeasurable. It is unmeasurable because it comprises an infinite number of transformations, and moreover because its powers are infinite. There are in *māyā* powers of producing transformations. Because of the infinity of transformations, they are also infinite. The products of *māyā* which consist of essences, components of the transmigratory body and worlds, are also infinite because, being situated in each soul, they are not limited. The worlds are situated in each current [of *māyā*][52] and because of the infinity of currents,are infinite. *Karmans* also are situated in each soul and are infinite because the [souls] are not limited and have infinite manifestations.

द्वितीयः पटलः

पाशविचारः

[२१७]प्रतिज्ञायार्थकथनायाह **अथानादिमल** इत्यादि ।

[२१८]अथानादिमलः पुंसां पशुत्वं [२१९]परिकीर्तितम् ।
[२२०]तुषकम्बुकवज्ज्ञेयं मायावापाङ्कुरस्य तत् ॥ १ ॥

[२२१]अथेत्यादिसूत्रोपन्यस्तमात्मानं व्याख्याय तदनन्तरम् उपन्यासक्रमेणैव मलादयो व्याक्रियन्त इति । मलिनीकरोति दृक्क्रियात्मकं तेजः [२२२]प्रच्छादयतीति मलः । स च नेदानीं मलिनीकरोति किंत्वनादिः प्रवर्तत एव । स [२२३]चैतत्कार्यकर्तृत्वे त्वनादिसंबन्ध इति यावत् । तत्संबन्धस्य चानिमित्तत्वात्तस्याप्यनादित्वं सिद्धमेव । [२२४]अनादिश्चासौ मलश्चेति । मलस्यानादित्वमात्रमुक्तं स्यात् । [२२५]न, अनादिसंबन्धत्वम् [२२६]"अनाद्यशुद्धिशून्यत्वात्" इत्यनेन गतार्थमपि भवति ।

केषामसावनादिमलः । **पुंसाम्** । अत्र च [२२७]मलस्यैकवचननिर्देशात्पुंसां बहुवचननिर्देशात् सर्वेषां मलवतां पुंसामेक एव मल इति । तच्च पुंसां **पशुत्वं परिकीर्तितम्** । तस्मिन्मले सति पुमांसः पशव इत्युच्यन्ते । कलादिभिश्च पाशैः [२२८]पाश्यन्त इति । एतदुक्तं भवति "पुंसां पशुशब्दप्रवृत्तौ कलादिपाशैः [२२९]पाश्यत्वे च तन्निमित्तम्" इति ।

किंच **तुषकम्बुकवदि**त्यादि । यथा तुषकम्बुकः [२३०]शालितण्डुलानामावापस्योच्छूनतायां

II. DISQUISITION ON THE BONDS

In order to tell the object [of this chapter] after an announcement [the text] says : "athānādimalaḥ...".

Now [is described] the beginningless *mala* of the souls; it is well-known as being their nature of bound souls; it is to be understood as chaff and husk for the ripening and germinating of *māyā*. 1

After describing the soul mentioned in the *sūtra* "atha..." (I. 2), [the text] describes *mala*, etc. according to the order of the mention there. *Mala* means that which "malinīkaroti" i. e. covers the radiance made of knowledge and action. And it is not only now that it does this action of covering, but it acts without beginning, that is to say it has a beginningless relation with the property of being agent of that action. Beginninglessness is established also for that relation, as it has no cause. [*Anādimala* is a *karmadhāraya* compound signifying :] *anādiś cāsau malaś ca,*"it is beginningless and *mala*". [Therefore one could object thus :] only the beginninglessness of *mala* will be told,[not the beginninglessness of its relation with each soul. We answer :] no, [*mala's*] property to have a beginningless relation [with the soul] has already been understood by "anādyaśudddhiśūnyatvāt (because it is devoid of the beginningless impurity)" (I. 19).

To whom does this *mala* belong ? "Puṃsām (to the souls)". And because of the mention here of a singular ending for the *mala* and a plural ending for the souls, [we understand that] there is only one *mala* for all the *mala*-affected souls. And that *mala* of the souls is "paśutvaṃ parikīrtitam (well-known as their nature of bound soul)", i. e. : when there is *mala* the souls are called "bound souls". *Paśu* means the soul which "pāśyate (is bound)" by the bonds, *kalā*, etc.[53] This has been told :" That [*mala*] is the cause for the use of the word *paśu* and for the property of being bound by the bonds, *kalā*, etc. ".

Moreover it is "tuṣakambukavat...". Chaff and husk are a cause for the *āvāpa* of rice grains, i. e. for the readiness [of seeds] to germinate, when they are swollen, and for the appearance of the germ; in the same way [*mala*] is the cause for the *āvāpa* of *māyā*, i. e. for

प्रसवाभिमुखीभावस्याङ्कुरोत्पत्तेश्च निमित्तम्, एवं [२३१]मायायाः शिवेच्छावशादावापस्य प्रसवाभिमुखीभावस्य कलाद्यङ्कुरोत्पत्तेश्च निमित्तमिति। एतदुक्तं भवति "यस्य हि तदस्ति तं प्रति माया प्रसवाभिमुखीभवति कलादींश्चोत्पादयति" इति।

किं च तत्सद्भाववश इत्यादि।

[२३२]तत्सद्भाववशोऽज्ञादिपाशौघः पौरुषः स्थितः।
[२३३]तस्मात्तत्तत्त्वतो ज्ञेयं मोक्षमक्षयमिच्छता[२३४] ॥ २ ॥

तस्य सद्भावोऽस्तित्वं तद्वशस्तदायत्तः, तत्सद्भावे भवति विद्यते न तदसद्भावे, **तत्सद्भाववश** इति। कोऽसौ। अचेतनादिसूत्रपठितो **ऽज्ञादिपाशौघः**। अज्ञ इत्यज्ञत्वं व्याघातभावत्वं शोध्यत्वं बोध्यत्वं चेत्यज्ञादयः। अज्ञादिपाशानां मलानामोघः। **पौरुषः** पशुत्वावकुण्ठितपुरुषवर्तित्वात्। **स्थितो** नागन्तुकः। [२३५]क्वैते चाज्ञादयः। मूलपाशपशुत्वे सति विद्यन्ते। [२३६]यथा च पशुत्वे सति पुरुषे स्थित इति, अन्यतमेष्वपि [२३७]सत्त्वादुत्पद्यत इति, एतेऽपि पाशा इति। न तु परमार्थतः पाशाः, किं तु पशुत्वसंनिरुद्धबलस्य पुरुषस्यैते [२३८]धर्मा एव। एवं सर्वानर्थमूलत्वं पशुत्वस्य व्याख्यातम्।

यस्मात्सर्वानर्थमूलम्, [२३९]**तस्माद्**च्छेदाय **तत्त्वतो ज्ञेयम्**। [२४०]न च तदविदितं व्युच्छेत्तुं शक्यम्। न च तस्मिन्नव्युच्छिन्ने सत्यक्षयो मोक्षो भवति। अतस्**तत्त्वतो** परमार्थतो **ज्ञेयम्** [२४१]अनुग्राह्याणाम् अक्षय[म्] शिवसायुज्यलक्षणं मोक्षं [२४२]कर्तुमिच्छता।

ये पशुमतप्रणीता मोक्षाः, ते तस्मिन्नव्युच्छिन्न एव भवन्तीति। अतस्ते क्षयधर्मिणः। कथम्। ये तावत्परमात्मादिषूपादानेषु लीनाः, [२४३]ते तेषु परिणमत्सु पुनर्निर्वर्तिष्यन्ते। येऽपि न क्वचिल्लीनाः केवलाः, तेऽपि [२४४]स्वानुष्ठितप्रक्षयवशात्तामवस्थां विहास्यन्तीति क्षयधर्मिणः। [२४५]शिवसायुज्यलक्षणस्तु मोक्षोऽक्षयः, न तत्र पुनरावृत्तिरिति।

its readiness to generate and for the appearance of the germ which is *kalā*, etc., under the pressure of Śiva's desire. That has been told : "*māyā* is ready to generate and begets *kalā*, etc. for the soul which possesses that [*mala*]".

Moreover "tatsadbhāvavaśaḥ...".

Depending on the true existence of [*mala*] the mass of bonds, ignorance, etc. which affect the soul, is established. Therefore that should be known in its true nature by one who desires total liberation. 2

"Tatsadbhāvavaśaḥ" means *tadvaśa* i. e. dependent on that *sadbhāva* i.e. the existence of that [*mala*] : if there is existence of that *mala*, it exists; if not, it does not exist. What is thus dependent ? "Ajñādipāśaughaḥ (the mass of the bonds)" which has been mentioned in the *sūtra* "acetanaḥ" (I. 6). The bonds, *ajña*, etc. are the ignorance, the being subject to obstruction, the fact to need purification and the fact to need awakening. "Ajñādipāśaughaḥ" means : the mass of bonds, ignorance etc. i. e. impurities. It is *pauruṣa* because it resides in the *puruṣa*, 'soul' crippled by its nature of bound soul. It is *sthita*, 'established' i. e. not adventitious. Where are ignorance, etc. situated ? They exist when the nature of bound soul, which is the basic bond, is there. And as [this group of ignorance, etc.] is told to be established in the soul, when there is the nature of bound soul, in the same way each one, among ignorance, etc. is born from the existence [of the nature of bound soul]. Therefore they are also bonds. But they are not fundamentally bonds, they are only properties of the soul the power (*śakti*) of which is blocked by its nature of bound soul. Thus is explained the fact that the nature of bound soul is the root of all miseries.

Because it is the root of all miseries, "tasmāt (therefore)", in order to extirpate it, "tattvato jñeyam (it must be known in its true nature)". It cannot be eliminated without being known. And if it is not eliminated, there is no unending liberation. Therefore it must be known "tattvataḥ" i. e. in its deepest essence, "icchatā (by one who desires)", among the souls fit for grace, to achieve a *mokṣa* (liberation) which is "akṣayam" i. e. consisting of equality with Śiva. The liberations which have been conceived by bound souls[54] take place when this bound nature has not been eliminated. Therefore they have the property to have an end. How ? Those [liberated souls] which have been reabsorbed in their material cause, the supreme self or other, will cease to be liberated when their causes have a new evolution. Those who are isolated, not being reabsorbed anywhere, will leave that state [of isolation] as the consequence of the decline of their *karman*. Therefore these liberations have the property to end. But the liberation which consists in equality with Śiva is without end; there is no return from it.

तत्कुतो ज्ञेयम् । पतिज्ञानादेव । यतः [२४६]**पतिज्ञानैकगम्यं तदि**त्यादि ।

[२४७]पतिज्ञानैकगम्यं तदितरेषामगोचरम् ।
तेन [२४८]तज्ज्ञानिभिर्मुक्तोऽशुद्धात्मा सोच्यतेऽबुधैः ॥ ३ ॥

अत्र चैकग्रहणमवधारणार्थम्, पतिज्ञानस्यैवैकस्य गम्यं तदिति । [२४९]अवधारणे फलं दर्शयति – **इतरेषां** पशुज्ञानानाम् **अगोचरम्** इति । [२५०]येन च कारणेनेतरेषामगोचरं **तेन तज्ज्ञानिभिरि**तरज्ञानिभिरशुद्धात्मैव मुक्त इत्युच्यते । **अबुधैरि**ति कारणं, यतस्तेऽबुधाः पशुत्वविषयबोधरहिता इति ।

अथ [२५१]तेषां सर्वार्थदर्शित्वात् कारुणिकत्वाच् [२५२]चायुक्तमनृतवक्तृत्वम् । किंतु तैरनुक्तत्वादश्वशृङ्गवदशुद्धिरेव नास्तीति । **यद्यशुद्धिरि**त्यादि ।

यद्यशुद्धिर्न पुंसोऽस्ति [२५३]सक्तिर्भोगेषु किंकृता ।
शुद्धे पुंसि न [२५४]तद्भोगो जाघटीति विपश्चितः ॥ ४ ॥

अशुद्धयाविद्ययाशुद्धस्य पुंसो भोगस्य क्रियाविषयेष्वनित्याशुचिदुःखानात्मस्वभावेषु [२५५]सक्तिर्भोगेषु । किमु[त] न हि शुद्धस्य निरञ्जनस्याशुद्धेषु सक्तिर्भवति । [२५६]अथाशुद्धिवादिनोऽपि रागतः सक्तिः, नाशुद्धित [२५७]इति । सत्यम्, किं तु न रागः शुद्धस्याशुद्धेषु सक्तिं कर्तुं शक्नोति । भोगाभ्यासतस्तर्हि भविष्यतीति । [२५८]**शुद्धे पुंसि** सति तस्य **भोग** एव तावन्न **जाघटीति** युक्तया युज्यते, [२५९]किमुत तदभ्यासः । तस्माच्च सक्तिरिति । किं कारणम् । यतो न हि शुद्धस्य शिवस्य भोगः संभवति । भोगो हि संज्ञानं स्यात् ।

That bound nature can be known from what ? Only from the knowledge given by the lord, because "patijñānaikagamyam...".

That [bound nature] can be understood only from the knowledge given by the Lord, is not the object of other [knowledges]. Therefore the ignorant upholders of these knowledges call "liberated" an impure soul. 3

And here the mention of "-eka- (unique)" aims at an exclusive determination : it is understood by a unique source, i. e. Śiva's knowledge only. [Then the text] shows the fruit of that exclusive determination : it is "agocaram (non-object)" "itareṣām" i. e. of the knowledges given by bound souls. And for the reason for which it is non-object of other knowledges, "tena" for this reason nothing else than a bound soul is called "liberated" "tajjñānibhiḥ" i. e. by the upholders of the other knowledges. "Abudhaiḥ" is the cause of that : because they are *abudha* i. e. deprived of the understanding of what is the bound nature.

If [one objects that] it is not correct to say that these [bound souls] speak the untruth, because they are omniscient and full of compassion, that [55]on the contrary, the impurity does not exist, like the horns of a horse, because it is not mentioned by them, [the text answers :] "yady aśuddhiḥ...".

If the soul has no impurity, what is the cause of its attachment to experience. If the soul is pure, its experience is absolutely improper, for one who knows. 4

Being impure because of "impurity" i. e. delusion (*avidyā*), the soul has an attachment to "bhogeṣu" i. e. the objects of the action of experience, the nature of which is non-eternal, impure, painful and non-self. All the more the soul which is "pure" i. e. without *mala*, has no attachment to the impure [objects of experience]. Now [one could object] that even for the upholder of the existence of impurity, attachment comes from the *rāga*, not from the impurity. That is true, but *rāga* cannot produce the attachment of a pure soul to impure objects. [If it is argued that] the attachment will come to the pure soul because of the repetition of experience, [the text answers :] if the soul is pure, first the experience itself "na jāghaṭīti" i. e. has absolutely no justification, all the more the repetition of experience. And therefore attachment [also will have no justification]. For what reason ? Because experience is not possible for the pure Śiva[56]. [If it existed for Śiva] experience would be consciousness. If [it is argued that experience] is a knowledge

[260]चिच्छक्त्युपरञ्जिता बुद्धिरिति चेत्, शिवशक्तिरियम्, अशुद्धगोचर उपरक्तत्वात्साप्यशुद्धेत्य-तोऽपि न युक्तिमान्। न हि शुद्धस्य निरञ्जनस्य शक्तिव्यक्तिरशुद्धा [261]दृष्टेति।

तत्र युक्तिमान् भवति, यतः पुंसश्चैतन्यं भोगकारणमस्ति, तेन हि [262]भोगमासादयति – नाशुद्धौ शुद्धिं कल्पयित्वान्यच्चैतन्यमपि कल्पनीयम् – अचेतनस्य भोगानुपपत्तेरिति। **अथ चेद्युक्तिमानि**त्यादि।

अथ [263]चेद्युक्तिमान्भोगः सा युक्तिर्नोपपद्यते।
[264]मुक्तसंसारवर्त्मस्थविशेषाप्रतिपत्तितः॥ ५॥

यद्युक्तया युक्तया **युक्तिमान्भोग** इति मन्यसे, **सा युक्तिर्नोपपद्यते**। **मुक्तसंसार-वर्त्मस्थविशेषाप्रतिपत्तित** इति दूषणम्। तया युक्तयाभ्युपगम्यमानया मुक्तसंसारवर्त्मस्थयोर-[265]विशेषः स्यात्, उभयोरपि चैतन्योपपत्तेः। अयं मुक्तोऽयं संसारवर्त्मस्थ इत्ययं विशेषो न स्यादिति।

तस्मादभ्युपगन्तव्य इत्यादि

तस्मादभ्युपगन्तव्यो विशेषः पुंमलात्मकः।
यस्मिन्नसति मुक्तात्मा [266]बद्धात्मा च सतीष्यते॥ ६॥

यस्मान्मलं विनायमविशेषदोषप्रसङ्गः, [267]**तस्माद**वश्यं तत्समाधानाया**भ्युपगन्तव्यः**। विशेषयतीति विशेषः। पुंसो[र्मु]क्तसंसारवर्त्मस्थयो**र्मलात्मकः** मलरूपः। कथमेकोऽपि सन् द्वयोर्विशेष इति - **यस्मिन्नसती**त्यादि। एकं सत्त्वेन विशेषयति [268]अन्यं चासत्त्वे[ने]ति।

नन्वन्य एव विशेषोऽस्ति। कोऽसौ। यस्य [269]मायात्मका विकारा विद्यन्ते स [बद्धः], न विद्यन्ते स मुक्त इति। विद्यते चास्माकमशुद्धिः पञ्चपर्वविपर्ययः। स यस्यास्ति स बद्धः।

coloured by the *śakti* of consciousness, [we answer :] this is Siva's *śakti* of consciousness and even the *śakti* would become impure because of being coloured in the field of impure objects. The experience receives no more justification from that argument. As a matter of fact one has never seen an impure manifestation of *śakti* for a pure stainless entity.

[One will object now :] in these conditions [experience] has a justification from the fact that the consciousness of the soul is its cause, since it is with the help of this [consciousness] that the soul gets the experience — one cannot postulate another [impure consciousness] by postulating impurity in purity —, because there is no possibility of experience by a non-conscious entity. "Atha ced yuktimān...".

If it is objected that the experience has a justification [in this way, the answer is :] this justification is not possible, because in that case there would be no understanding of the difference between the liberated soul and one which stands on the path of transmigration. 5

If you think that experience has a justification by the aforesaid argument, [we answer that] this justification is not possible. "Mukta-..." is the criticism. By the justification accepted by you, there would be no understanding of the difference between the liberated soul and one which stands on the path of transmigration, because of the possibility of consciousness for both; there would be no difference allowing to say "this one is a liberated soul, this one stands on the path of transmigration".

"Tasmād abhyupagantavyaḥ...".

Therefore one must accept the factor of differentiation consisting of soul's *mala*, in the absence of which the soul is accepted as liberated, in the presence of which it is accepted as bound. 6

Because, if there is no *mala*, there occurs that defect of absence of difference, therefore to suppress that defect one must necessarily accept [a factor of differentiation]. *Viśeṣa* means the factor "viśeṣayati (which differentiates)". It is "malātmakaḥ" i. e. consisting of *mala*, [factor of differentiation of] "puṃsoḥ" i. e. the liberated soul and the soul which stands in the path of transmigration. How, being unique, is [this *mala*] a factor of differentiation of two entities ? [The answer is :] "yasminn asati..." : it differentiates one by its existence, the other by its absence.

But one may object : there is another factor of differentiation. What is it ? The soul for which there are transformations made of matter, is bound; the soul for which there are none is liberated. And we have an impurity which is the five errors[57]. The soul which has

यस्य नास्ति स [२७०]मुक्त इति । विद्यमाना वा मायात्मका विकारा यस्यार्थसाधनाय प्रवर्तन्ते [२७१]स बद्धः, यस्य न प्रवर्तन्ते स मुक्त इति । यत्तावदुक्तित्रयेणापि विमुक्तस्य लक्षणमुक्तम-तस्तदयुक्तम्, यतः केवलस्य न तदस्ति, न चासौ [२७२]मुक्त इति । अमुक्तत्वं च तस्याज्ञत्वात्, सुषुप्त्यवस्थावस्थितासुवत् । यैरपि सर्वज्ञो मुक्त इत्युक्तः, तैरपि स चाभ्युपगतायामेवाखिलप्रक्रियायां [२७३]सर्वशब्दोऽपि विवक्षितः । न तेनैवासौ [२७४]परमार्थतः सर्वज्ञः शिवा[द्यप]रिज्ञानात् ।

यच्च [२७५]ब[द्ध]स्य लक्षणमुक्तम्, तन्निराकरणायाह - **तद्भावभाविन** इत्यादि ।

तद्भावभाविनो [२७६]भावाः सर्वे मायात्मकाः पशोः ।
द्विविधं साधयन्तीह [२७७]पुरुषार्थं परापरम् ॥ ७ ॥

तत्राद्यस्य पक्षस्य दूषणम् । तद्व्यतिरिक्तस्य मलस्य सद्भावे [२७८]मायात्मकभा[वाः] पशोः संसारिपुरुषस्य भवन्ति, [२७९]न तस्यासद्भाव इति ।

सर्वग्रहणं द्वितीयस्य पक्षस्य निराकरणार्थम् । न परं तस्य सद्भावे मायात्मका भावाः [२८०]तत्त्वभावभुवनभूताख्याः पशोर्भवन्ति, प्रत्ययाख्या अपि तत्सद्भाव एव भवन्तीति । प्रत्ययान्तःपाती च [२८१]विपर्ययः ।

तृतीयस्य पक्षस्योत्तरार्धेन निराकरणम् । न परं तद्भावभाविनो भावाः [२८२]सर्वे मायात्मकाः पशोः, किंतु तत्सद्भाव एव [२८३]द्विविधं साधयन्तीह भावमण्डले पुरुषार्थं परापरम् । परं सुखलक्षणम्, अपरं दुःखमोहलक्षणमिति । मतान्तराभिप्रायेण वा पुरुषार्थस्य परापरत्वम् । परं कैवल्यादिरूपम्, [२८४]अपरं सुखदुःखमोहरूपम् ।

इत्येवं पक्षत्रयोक्ता अपि भावाः स्वतो व्यतिरिक्ते मले निमित्ते सति संसारिणो [२८५]भवितुमर्हन्ति, नेतरथा मुक्तात्मनोऽपि प्रसङ्गात् । उपादानाधिकारो निमित्तमिति । कोऽयमुपादानाधिकारः । पुरुषभोगादानाय प्रवृत्तिरिति । [२८६]न तदपि, उपादानेन भोगं न मलं

this impurity is bound, the soul which does not have it is liberated. Or the soul for the realisation of whose purpose transformations made of *māyā* are set in motion, is bound; the soul for which they are not, is liberated. [To this we answer :] the characteristic mentioned for the liberated soul in these three declarations is not proper, because it does not belong to the liberated soul; and the soul which is qualified by that is not liberated. It is not liberated through its own ignorance of that, as [one does not lose his] breath in the state of deep sleep[58]. Those who say that the omniscient is the liberated soul, want to refer by the word *sarva* (omni-) to the complete process [of knowing] accepted by them[59]. By only that process the soul is not really omniscient, because of the absence of knowledge of Siva, etc.

And to reject the characteristic which has been told for the bound soul [in these three formulae, the text] says : "tadbhāvabhāvinaḥ...".

All things made of *māyā* exist for the bound soul when *mala* exists [for the same soul]; they help to realise in this world the twofold aim of the soul, the inferior and the superior one. 7

This is a critic of the first view[60]. If the *mala*, different from them, exists, things made of *māyā* exist "paśoḥ" i. e. for the transmigratory soul, but they do not exist in the absence of that *mala*.

The mention "sarve" is made to eliminate the second view[61]. In the presence of *mala* not only the things made of *māyā*, called essences, components of the transmigratory body, worlds and elements exist for the soul, but also those called *pratyayas* exist when there is *mala*. And the five errors are included in the *pratyayas*.

The third view[62] is eliminated by the latter half [of the stanza]. Not only all things made of *māyā* exist for the soul when *mala* exists, but also it is when *mala* exists that they help to realise "iha" i. e. in the realm of existence the twofold aim of the soul, the superior and the inferior one. The superior one is characterised by pleasure, the inferior one by pain and delusion. Or the superiority and inferiority of the aim of the soul [are mentioned by the author] thinking of other opinions : the superior one is liberation, etc., the inferior is made of pleasure, pain and delusion.

Thus the entities mentioned in the three views are fit to exist for the transmigrating soul, if the *mala* different from them exists by itself as a circumstance of their existence, not otherwise, because [otherwise] their existence would follow for the liberated soul. [One could object :] the circumstance of their existence is the setting in action of the material cause. What is the setting in action of the material cause ? It is its setting in motion to become object of experience by the soul. [We answer :] that is also not correct. It has

विना निर्मलः पुरुषो भोक्तुमर्हतीत्युक्तम् । पुरस्तात्कर्म तर्हि निमित्तमिति । कर्मापि किमर्थमेतान्करोति । पुरुषभोगादानायेति चेत्, समानः पूर्वेण । सर्वं चैतत्पुरुषगुणनिरोधके मले सत्यर्थवद्भवतीत्यभ्युपगन्तव्यो मल इति ।

एवं तावन्मलं व्याख्याय व्याकरोति मायातत्त्वम् - **मायातत्त्वमि**त्यादि

मायातत्त्वं जगद्बीजमविनाश्यशिवात्मकम् ।
[२८७]विभ्वेकमकलं सूक्ष्ममनाद्यव्ययमीश्वरम् ॥ ८ ॥

[२८८]मात्यस्यां प्रलये सर्वं जगदिति **माया** । [२८९]ततो नो सर्वं कार्यमिति **तत्त्वम्** । जगतो **बीजमु**पादानम् । तस्याविनाश्यादीनि [२९०]पदानि स्वरूपमभिदधते । पशुप्रोक्तेभ्यश्च जगद्बीजेभ्य-स्तन्निर्धारयन्ति । तत्र**विनाशि** अचेतनानामनेकेषां [२९१]विनाशित्वं दृष्टम्, सत्यप्यचैतन्येऽस्य स्यादेकत्वम्, ततो न विनाशित्वम् । किं चा**शिवात्मकम**चेतनम्, तत्कार्यमचेतनं दृष्ट्वानुमीयते । किं च [२९२]**विभु** पुरुषानन्त्यस्य भोगाय तिर्यगूर्ध्वमधःस्थितैः स्रोतोभिः सर्वकर्माणि सर्वत्र करोतीति । [२९३]किं **चैकम्** पक्षतुण्डादिभेदानामविभागाधिष्ठानमेकं दृष्टम्, अतः [२९४]कलादिकार्यभेदानामप्यविभागाधिष्ठानमेकं तदिति । किं [२९५]**चाकलम्** पुरुषार्थसाधनसमर्थकलादिविभागरहितम् । [२९६][अ]थान्यैर्ग्रन्थितत्वम् । [२९७]पुरुषार्थसाधनं नित्यं च पुरादिसंनिवेशवदनेकरुद्रभोग्यं चायुक्तिमत्क्लृप्तम् । कथमयुक्तिमत्त्वम् । [२९८]यतो न क्वचित्पुरादीनि नित्यानि दृश्यन्ते । नापि तत्संनिवेशादपि भोग्यमिति । यदि तन्न सकलं कथं तत्र मण्डलेशाः स्थिता इति । [२९९]न ते तत्र स्थिताः, किंतु तत्समानदेशत्वात्तत्र स्थिता [३००]इत्युच्यन्ते । य एव तस्याधिकारदेशः स एव तेषामपीति । किं च **सूक्ष्मम्** न

already been told that the pure soul is not fit to experience objects with the help of the material cause, without the *mala*. In that case, [one will object :] the acts of yore are the circumstance. [We answer :] why do the acts also cause the existence of those [things made of *māyā*] ? If you say it is for making them objects of experience by the soul, the situation is the same as before. And all that has a purpose if there exists the *mala* which obstructs the qualities of the soul. Therefore *mala* must be accepted.

After explaining the *mala*, [the text] explains the essence *māyā* : "māyātattvam...".

The essence *māyā* is the seed of the world, is not subject to destruction, is not made of śiva-ness, is omnipresent, unique, has no parts, is subtle, without beginning, without wear, sovereign. 8

Māyā is that in which all the universe *māti*, "is contained" at the time of re-absorption[63]. Because from that [*māyā*] all the products are issued for us, it is an essence (*tattva*) [of everything]. It is "bījam", i. e. the material cause of the world. The words "avināśi", etc. express its nature. They distinguish *māyā* from the causes of the world taught by bound souls[64]. Among these words "avināśi" : one sees that the property of being subject to destruction belongs to unconscious things which are manifold; even though the essence *māyā* is devoid of consciousness it must be unique; therefore it is not subject to destruction. Moreover it is "aśivātmakam" i. e. without consciousness; that is inferred after seeing that its products have no consciousness. Moreover it is "vibhu" i. e. it produces everywhere all objects of action through currents[65] in opposite directions, above and below, for the experiences of an infinity of souls. And it is "ekam" : one sees only one undivided location,[the egg of the peacock] for the different parts of body produced [from it], the feathers, the beak, etc.; therefore this *māyā* is a unique undivided location for its different products, *kalā*, etc. And it is "akalam" i. e. devoid of divisions such as parts, etc. able to realise the aim of the soul. [One could object that] it is intertwined with other entities. [One answers :] an entity which is a means of realisation of the aims of the soul, which is eternal, subject to the placement in itself of *puras*, etc., and enjoyed by many Rudras, is imaginary and has no justification. How is it devoid of justification ? Because one sees nowhere *puras*, etc. which are eternal; and this [*māyā*] is not an object of experience even by placement of [*puras*, etc.] in it. But,[one may object,] how are the Lords of *maṇḍalas* residing in *māyā*, if it has no parts ? [We answer :] they are not residing in *māyā*; they are told to reside in it, because they have the same place; the place of undertakings of this [essence *māyā*] is the place of their undertakings also. Moreover it is "sūkṣmam" i. e. non-gross, as it has been told. If [it is objected that] it is intertwined with other entities [which are gross, one answers that] a manifested entity which has no

स्थूलमित्युक्तम् । [301]अथान्यैर्ग्रन्थितत्वम् । व्यक्तमनादिमत्क्लृप्तम् । न च तदनादिमद्बुद्धितत्त्ववत्, [302]व्यक्तस्याव्यक्तपूर्वकत्वादिति । [303]किं **चानादि** । कारणशून्यत्वाच्च यदनादि [304]न तत्सर्वात्मना परिणमते । किं तु शक्त्यात्मनावस्थिताः सन्तो विकारास्तत उत्पद्यन्ते व्यक्तिमासादयन्ति । [305]येषां सर्वात्मना जगद्बीजं परिणमते, तेषामनित्य एव विकारः प्राप्नोति, न पूर्व इति । किं **चाव्ययम्** न तस्य विकारशक्तयो [306]व्ययं गच्छन्ति । किं **चेश्वरम्** [307]सर्वाधिकरणमापूरकत्वात्, उपादानेन सुपूरितो विकारः [308]पुरुषार्थसाधनमिति, भविनां च भोजकत्वादिति ।

तस्मात्कालकले इत्यादि सूत्रद्वयम् ।

तस्मात्कालकले रागविद्याव्यक्तं [309]गुणान्धियम् ।
[310]बुद्धितत्त्वादहंकारं तन्मात्राणीन्द्रियाणि च ॥
तन्मात्रेभ्यश्च भूतानि सर्वं च [311]क्रमशोऽसृजत् ।
[312]विद्याविद्येश्वरेशानः शिवशक्तिसमर्थितः ॥९-१०॥

कला च कला चेत्येकशेषः । कालश्च कला च **कालकले** । [313]तत्रैकः कलाशब्दो नियतिमभिधत्ते, द्वितीयस्तु कलामेव । कथं कलाशब्दो नियतिमभिधत्ते । यतः सापि कलयति प्रेरयतीति नियतिः कर्मफलभोजकत्वेन । उक्तं च प्रेर्यमाणे नियत्येति । **रागविद्याव्यक्तं गुणानि**त्यत्र [314]गुणेभ्यः पृथगव्यक्तमुक्तम्, अध्वनि तु प्राधानिकशब्देन गुणान्वक्ष्यति । सामान्यशास्त्रप्रसिद्धया तेभ्यो व्यतिरिक्तमव्यक्तम्, तैः शुद्धैस्तच्छुद्धमेव दृष्टमित्यभिप्रायः । न वा, [315]तत्र स्रोतस्यव्यक्तस्य भुवनत्वेन व्यवस्थानमस्तीति । कथं प्रधानशब्देन गुणतत्त्वं विवक्षितमिति । तदनन्तरं बुद्धितत्त्वश्रवणाद्योगिनामधिष्ठानाभावाच्च । तत्राव्यक्तानन्तरे हि योगिनो गुणतत्त्वान्येव श्रूयन्ते । **सर्वं चे**ति यदिह [316]नोक्तम्, अध्वनि चान्तरालेऽण्डस्याभिधायके सामान्यशास्त्रे च [317]प्रसि[द्धं] सूक्ष्मेभ्यो भूतेभ्यः स्थूलानां प्रभूताख्यानां भूतानां च पञ्चकम् । [318]तच्चा**सृजदि**ति स[र्वं] चैतत्कालादि भूतान्तं

beginning is imaginary. And such [a manifested entity] is not beginningless, like the essence *buddhi*, because the manifested is preceded by the unmanifested. Moreover [the essence *māyā*] is "anādi". And an entity which has no beginning because it has no cause, does not evolute in the whole of itself; but transformations which are established in it potentially, take birth from it, i. e. obtain manifestation. For those for whom the seed of the world evolutes in the whole of itself, only a temporary transformation has a chance to occur, not one which has already occurred previously. Moreover [the essence *māyā*] is "avyayam" i. e. its powers of transformations do not decrease. Moreover it is "īśvaram" i.e. the location of everything, because it fills up [everything], — as the transformation which is well filled up by its material cause is a means of realisation of the aims of the soul —, and because it causes the transmigrating soul to have experiences.

A group of two *sūtras* : "tasmāt kālakale...".

From this [essence *māyā*] the Lord of Mantras and of Vidyeśvaras empowered by Siva's *śakti*, created successively [one from the other] time, two *kalās*, *rāga*, *vidyā*, the unmanifested, the [three] *guṇas*, *buddhi*, from the essence *buddhi* the *ahaṃkāra*, the *tanmātras* and the *indriyas*, from the *tanmātras* the elements, and everything. 9-10

"Kālakale" means *kālaś ca kalā ca* (*dvandva* compound signifying 'time and *kalā*'), *kalā* being the one word remaining from the expression *kalā ca kalā ca*[66]. Thus one word *kalā* expresses destiny, the second one the *kalā* itself. How does the word *kalā* express the destiny ? Because destiny also *kalayati* i. e. impells; therefore destiny [is a *kalā*] as it impells to the experience of the fruits of *karman*. And it has been told "when it is impelled by destiny...". In "rāgavidyāvyaktaṃ guṇān" the *avyakta* is mentioned apart from the *guṇas*, but in the chapter on *adhvans* the text will refer to the *guṇas* with the word *prādhānika* (IV. 37). The intention is that because of the well-known character of the general teaching the *avyakta* is different from the *guṇas*; but this pure *avyakta* itself is seen through the pure *guṇas*[67]. Or it is not thus, the *avyakta* is established as a world in this *srotas* [of *guṇa-tattva* called *prādhānika*][68]. [But] how does the text want to mean the essence *guṇa* through the word *pradhāna* ? Because we hear the mention of the essence *buddhi* immediately after, and because [without the *guṇa-tattva*] there will be no location for yogins. Immediately after *avyakta* the essence *guṇa* is revealed [as location] for yogins. "Sarvaṃ ca" i. e. what has not been told here, which is well-known in [the chapter] on *adhvan* and in the common teaching which describes the universe-egg, i. e. the pentad of the gross elements called *prabhūta* issued from the subtle elements. "Asṛjat" : [he created] that, i. e. all that begins with time and ends with the elements, not from one essence, but

नैकस्मात्तत्त्वात्, किं तु [**क्रमशोऽसृ**]जदिति । तस्माच्चाहंकारादिक्रम उक्त एव । अनेन तु धीपर्यन्तान्यपि क्रमेणासृजदिति ज्ञापयति । कुत एतत् । विच्छेदपाठात् । [३१९]अन्यथाविच्छिन्नमेव पठितं स्यात् । किं कुतोऽसृजत् । यद्यस्यात्र संनिहितं [३२०]तत्ततः । तत्र [३२१][का]लादित्रितयमप्येकावच्छेदविशिष्टत्वान्मायातत्त्वादिति । असंदिग्धमेव रागादित्रयमप्येकावच्छेदविशिष्टत्वादतिसंनिहितायाः कलातः । [३२२]एवमतिसंनिहितादव्यक्ताद्गुणान्गुणेभ्यो धियमिति ।

कोऽसृजदिति । **विद्याविद्येश्वरेशानः** । किं शिवः । न, **शिवशक्तिसमर्थितः** । शिवशक्तेरतिसंनिकर्षादनन्तेशः ।

किं तत्त्वसर्गमेव । **भावानि**त्यादि ।

[३२३]भावान्प्रत्ययसर्गांश्च भूतानि भुवनानि च ।
सोऽसृजद्भगवानीशः सर्वं [३२४]मायात्मकं जगत् ।। ११ ।।

भावान्धर्मादीन्बुद्धिरूपाख्यान्, [३२५]**प्रत्ययसर्गांश्च** सिद्ध्यादिकान् [३२६]सामान्यशास्त्रप्रसिद्ध्या बुद्धितः, **भूतानि** शरीराणि भुवनेभ्यः, – कालादीन्येव तत्त्वानि क्रीडाभूमित्वेन संनिविष्टानि भुवनान्युच्यन्ते –, तानि च । किमन्यो [३२७]भावादीनसृजदिति । स एवा**सृजदि**ति । **भगवान्** अनन्तेशः । **सर्वं मायात्मकं जगदि**ति सर्वं चैतत्तत्त्वादिभुवनान्तजगत् प्राक्छक्तिरूपेणावस्थितं मायायां, तस्याः सकाशात्प्रोक्तेन क्रमेणोत्पादितमनन्तेशेनेति । अतः सर्वं मायात्मकं [३२८]मोहात्मकं च मोहयति पुरुषम्, अश्रेय एव श्रेयस्तया ग्राहयतीति । उपसंहारश्चायं मायात्मकस्य तत्त्वस्येति ।

[३२९]अथ कर्मबन्धः । प्राक्प्रोक्तम् अशुद्धितः ससाधनो भोगः पुरुषस्य भवतीति । इदानीं [३३०]कारणान्तरसमुच्चयतः कर्मतश्चेति – [३३१]**कर्मतः परिणामोऽस्ये**त्यादि ।

कर्मतः परिणामोऽस्य जगतस्त्रिगुणात्मकः ।
[३३२]शान्तघोरविमूढात्मा नितान्तविषमस्ततः ।।१२।।

"kramaśaḥ" [one from the other in succession]. Therefore the sequence *ahaṃkāra*, etc. has already been told [as derived from the previous one by "tasmāt...kramaśaḥ"; it was not necessary to repeat "buddhitattvāt..."]. But the text reveals thus that [the essences from time] upto *buddhi* were also created in succession one from the other. How [does it reveal this] ? By the interrupted enumeration. Otherwise the enumeration would have not been interrupted. [The Lord] created what from what ? What in this list is closed to another term, was created from that one. The group of three, time, [destiny and *kalā*] is issued from *māyā*, because they are qualified by one and same delimitative property[69]. Without doubt, the group of three, *rāga*, [*vidyā* and *avyakta*] also is issued from the proximate *kalā*, because they are qualified by one and same delimitative property[70]. In the same way from the proximate *avyakta guṇas* are created, from *guṇas buddhi*.

Who did the creation ? "Vidyāvidyeśvareśānaḥ". Is it Siva ? No, it is a Lord "śivaśaktisamarthitaḥ" i. e. *Ananteśa*, because he is the closest soul to Siva's *śakti*.

Has he done only the creation of the essences ? [The text answers :] "bhāvān...".

This sovereign Lord has created the factors [of the transmigratory body] and *buddhi's* productions, the bodies and the worlds. All that universe is made of *māyā*. 11

"Bhāvān" i.e. *dharma*, etc. which are called the forms of *buddhi*; "pratyayasargāṃśca" i. e. *siddhi*, etc.[71] issued from *buddhi*, well-known through the general teaching, "bhūtāni" i. e. the bodies issued from the worlds, —the essences, time, etc., placed as pleasure-grounds [for these bodies] are called 'worlds' —, and these ["bhuvanāni" i. e. the worlds]. Did another [soul] create these factors, etc. ? [The text answers:] he alone created them. "Bhagavān" i. e. *Ananteśa*. "Sarvaṃ māyātmakaṃ jagat": and all that universe starting from the essences upto the worlds, which was previously standing potentially in *māyā*, was produced from it by Ananteśa in the afore-mentioned succession. Therefore all that universe made of *māyā* and of delusion deludes the soul and impels it to take as the highest good what is not so. This is the conclusion with regard to the essence *māyā*.

Now the bond of *karman*. It has been told previously that there is experience with its means of realisation, for the soul, because of *mala*. Now [it is told that] there is a group of other causes and *karman* : "karmataḥ pariṇāmo 'sya...".

From *karman* derive the transformation into this universe and the transformation of the three *guṇas*, the nature of which is peaceful, dreadful or deluded, and which is very unequal. 12

[333]कर्मणा भोगदानाय प्रवृत्तेनापेक्षितत्वात्**कर्मतः परिणाम** उद्भवोऽस्य भुवनाख्यस्य जगतः । यश्चायं त्रिगुणात्मको भावप्रत्ययाख्यपरिणामः [334]सोऽपि कर्मत उपादानात् । कुतस्त्रिगुणात्मकः । यतः शान्तघोरविमूढात्मा । सत्त्वादयो हि यथासंख्यं शान्तघोरविमूढात्मानः, अयमपि शान्तघोरविमूढात्मा त्रिगुणात्मकः । तत्र धर्मज्ञानवैराग्यैश्वर्याख्यः शान्तात्मा । अधर्मावैराग्यानैश्वर्याख्यो [335]घोरात्मा । अज्ञानाख्यो विमूढात्मा । एवं सिद्धितुष्ट्याख्यः शान्तात्मा । अशक्त्याख्यो घोरात्मा । विपर्ययाख्यो विमूढात्मा । संक्षेपतो वा सुखदुःखमोहाख्यक्रमेण शान्तघोरविमूढात्मा । कुत एतत् । [336]**कर्म[त]** इति । **नितान्तविषमस्ततः** अनेकरूपोऽत्यर्थं विषमश्च [337]कर्मत इति ।

[338]**कर्मतश्च शरीराणी**त्यादि ।

कर्मतश्च शरीराणि [339]विविधानि शरीरिणाम् ।
कर्मतः सर्वमेवेदं सुखदुःखात्मकं फलम् ॥१३॥

कर्मावष्टब्धेभ्य उपादानेभ्यः शरीराण्युत्पद्यन्ते, यतो **विविधानि** विविधं च कर्मेति । एतदुक्तं भवति । यज्जातीयानि यादृशान्येव कर्माण्युपभोक्तव्यानि, तज्जातीयानि तादृशान्येव शरीराण्युत्पद्यन्ते । अतः कर्मावष्टब्धेभ्य इति । किं च **कर्मत** आलम्बनात् **सर्वमेवेदं** [340]**सुखदुःखात्मकं** सुखदुःखमोहोपरक्तं **फलं** वेदनाख्यमिति ।

तेन कर्म प्रकुर्वन्तीत्यादि ।

तेन कर्म प्रकुर्वन्ति लब्धदेहाणवोऽसकृत् ।
[341]पशुत्वादन्वितात्मानो [342]भोगविप्लुतचेतसः ॥१४॥

येन च कारणेन कर्मतः [343]ससाधनं फलमिति प्रमाणतो [344]निश्चितम्, तेन कर्म प्रकुर्वन्ति लब्धदेहाणवोऽसकृत् ।

Because *karman*, when set in motion to give experiences, needs it, "karmataḥ" [from itself] is derived "pariṇāmaḥ" i. e. the birth "asya jagataḥ" [of this universe] called 'worlds'. And also the transformation called 'factors [of the transmigratory body] and products of buddhi', which is "triguṇātmakaḥ (made of the three *guṇas*)", is derived from *karman* as its material cause. Why is it made of the three *guṇas* ? Because it is "śāntaghoravimūḍhātmā" : in fact *sattva*, etc. are respectively of peaceful, dreadful and deluded nature; this transformation also, being of peaceful, dreadful and deluded nature, is made of the three *guṇas*. Among the three [the transformation] which is called *dharma*, knowledge, dispassionateness, mastery, is of peaceful nature; that which is called *adharma*, non-dispassionateness, non-mastery is of dreadful nature; that which is called ignorance is of deluded nature. In the same way that which is called realisation and satisfaction is of peaceful nature; that which is called impotency is of dreadful nature; that which is called error is of deluded nature. Or in a short style that which is called pleasure, pain and delusion, is of peaceful, dreadful and deluded nature respectively. From what does that derive ? "Karmataḥ (from *karman*)". "Nitāntaviṣamas tataḥ" : this transformation, being of several natures is very unequal ["tataḥ" i. e.] because of that *karman*.

"Karmataś ca śarīrāṇi...".

And from *karman* derive bodies of different species for the souls. From *karma* derives all this, which is its fruit made of pleasure and pain. 14

The bodies are born from their material causes supported by *karman*, because they are of different species and because *karman* is of different kinds. This has been told : "bodies are born, being of the same species and kind as the *karmans* which have to be experienced; therefore they are born from [their material causes] supported by *karman*". And "karmataḥ (from *karman*)" as its support derives "sarvam evedaṃ sukhaduḥkhātmakaṃ phalam" i. e. the fruit called "sensation" coloured by pleasure, pain or delusion.

"Tena karma prakurvanti...".

Therefore souls receive bodies and perform *karmans* many times. Because of their bound nature they are connected with [*māyā*, products], their mind being submerged in experience. 14

Because it is concluded from a proof that a fruit with its means of realisation is derived from *karman*, for this reason the souls obtain bodies and perform *karmans* many times.

नन्विदं फलमश्रेयः । कथमस्य सिद्धये कर्म कुर्वन्ति । अश्रेयश्च दुःखमोहात्मकं तावत्स्वरूपत एव । [३४५]सुखात्मकमपि प्रयाससाध्यत्वाद् दुःखमोहानुरक्तत्वात् [३४६]सातिशयत्वात् क्षयत्वाच्चाश्रेयः । तत्सत्यम्, किं तु पशुत्वान्निमित्तान्नोर्ध्वं निरतिशयं श्रेयः पश्यन्तोऽधोमुखाश्च सन्तो मायाविकारैश्चान्वितात्मानो भोगे च कर्मफले विशेषतः प्लुतं [३४७]परतरश्रेयस्त[या] गतं चेतो येषां ते । एतदुक्तं भवति । न ते [३४८]तदश्रेयस्त[या] पश्यन्ति प्रागुक्तेन न्यायेन सुखलवास्वादनलुब्धाः सर्वमेव परश्रेयस्तया पश्यन्तीति । तेन तत्सिद्ध्यर्थं कर्म कुर्वन्तीति ।

[३४९]यत्तावदुक्तम्, कर्मतः फलं पशुत्वाच्चोक्तलक्षणाः सन्तः कर्म कुर्वन्तीति, अत्र केचिदाहुः - किं कर्मणा पशुत्वेन वा । अन्यदेव निमित्तमस्ति । किं तत् । भोगाभिलाषः, यतो न निरभिलाषस्य [३५०]मुक्तस्य पुंसो भोगोऽस्तीति । अपर आह - किं पशुत्वेन, कर्मैव केवलमस्तु, यतो [३५१]न क्षीणकर्मणो मुक्तपुंसो भोगोऽस्ति । अन्य आह - किं कर्मणा, पशुत्वमेव केवलमस्तु, [३५२]यतः पशुत्वादेव केवलाद्ग्रन्थितत्वे महातेजादिमण्डलेशरुद्रास्वादनं फलमासादयन्तीति ।

यदुक्तं तावद्भोगाभिलाषो निमित्तमिति, तन्न । भोगाभिलाषो न हि [३५३]भोगसाधनाच्छरीरसंबन्धात्प्रागूर्ध्वं भवेत् । यदि प्राक्, स च न भोगास्वादनं विनेति भोगास्वादनमपि प्राक्प्राप्नोतीति, ततश्च निष्प्रयोजनत्वाद्बन्धो न भवेत् । अथोर्ध्वम्, ततश्चानिमित्तो बन्धः स्यात्, [३५४]अनिमित्तत्वाच्च मुक्तस्यापि प्रसज्यत इति नष्टो मोक्षः ।

यच्चोक्तम्, कर्मैव केवलमस्त्विति, तन्न तस्यैवाभावप्रसङ्गात्, यतः पशुत्वं विना निर्निवारणः सर्वज्ञत्वादिधर्मः, न कश्चिदपि [३५५]किंचित्कर्म कुर्यात् । कर्म च विना न बन्धः । [३५६]बन्धाभावाच्च न मुक्तिः, कर्माभावाद्वा, यतो भवतां पक्षे केचित्कर्मण एव [३५७]सुचरिता

But [one may object thus :] the fruit [derived from *karman*] is not the highest good. How do the souls accomplish acts with the aim to realise the highest good. And that which consists of pain and delusion is not the highest good by its own nature; that which consists of pleasure also is not the highest good, because it is obtained by effort, coloured by pain and delusion, it has always something superior to itself and it is decreasing. [To this objection we answer :] it is true, but it is because of their bound nature that the souls do not look upwards towards the highest good without superior and, looking downwards, are "anvitātmānaḥ" [connected] with *māyā's* products, have their mind specially "plutam" [submerged] in the experience, fruit of *karman*, i. e. are attached to it as the highest good. This is told : "They do not see that [the experience] is other than the highest good, as told previously; being eager of tasting a particle of pleasure, they see everything as the highest good". Therefore to realise that they perform acts.

About that which was told first, namely that a fruit derives from *karman* and that because of their bound nature the souls with the mentioned characteristics perform acts, about that some say : what is done by *karman* or by the bound nature here ? There is another cause [they say]. Which cause ? The desire of experience, because a liberated soul which has no desire has no experience. Another says : what is the use here of the bound nature, let *karman* alone be [the cause of experience], since the liberated soul whose *karman* is consumed, has no experience. Another says : what is the use of *karman*, let the bound nature alone be [the cause], since, when they are tied by their bound nature alone, souls obtain a fruit which is the tasting of a great light, etc. the rank of Maṇḍaleśa, or Rudra.

To that which was told first, namely that the cause is the desire of experience, [we answer :] no, since there cannot be any desire of experience before and after the relation with a body which is the means of realisation of the experience. It [the desire] exists before, as there is no desire without tasting of experience, there must be also tasting of experience before and, therefore, there will be no bond (relation with a body and other means), since it will have no purpose. If [the desire] exists after, then the bond will also be without cause; and since it has no cause, it may occur also for the liberated soul; thus the liberation is lost.

And to that which has been told also, namely that *karman* alone can be [the cause, we answer :] no, because there will follow the absence of acts themselves, since without the bound nature the qualities of omniscience, etc. will have no obstruction, nobody will perform any act. And without acts there is no bond. And there will be no liberation, because of the absence of bondage, or because of the absence of acts, since in your view some accept liberation to occur through a mere well-performed act. Or let there be acts. However without the bound nature nothing will be able to bind the soul which has no

न्मुक्तिमिच्छन्ति । भवतु वा कर्म, तथापि पशुत्वं विना न निर्निवारणं [३५८]कश्चिद्ग्रन्थयितुं शक्नुयात् । बन्धाभावाच्च न मुक्तिः । न [३५९]ह्यबद्धो मुच्यत इति ।

यच्चोक्तम्, पशुत्वमेव केवलमस्त्विति, तन्न, पशुत्वे सत्यपि विज्ञानकेवलस्य बन्धादर्शनात् । बन्धं च [३६०]विना न मुक्तिः, यतो भवद्भिरुक्तं [३६१]शिष्यसुखबोधहेतुर्जगदुत्पत्तिरिति । अस्यार्थः - शिष्याणां सुखाय मुक्तये बोधः, तदर्थं जगदुत्पत्तिरिति । एतदुक्तं भवति - न विना जगच्छब्दवाच्यानि शरीरकरणानि प्रबोधः, बोधं च विना न सुखमेव, तदर्थं जगदुत्पत्तिरिति ।

अपर आह - किमेतैः परीक्षितैः । जगद्बीजमेव [३६२]यं प्रति वर्तते तस्य बन्धो भवति, यस्मान्निवर्तते तस्य मुक्तिरिति । [३६३]कुतो निमित्तात्प्रवर्तते । स्वभावत एवेति । यत्रान्यनिमित्तं न संभवति, तत्र स्वभावोऽङ्गीक्रियते । अत्र पुनराम्नायेन फलसाधनाय विहितं कर्मास्ति । यतः कर्माम्नायश्च [३६४]प्रमाणतया मतः, ततः कर्मतो निमित्तात्प्रवर्तते, कर्माभावाच्च निर्वतत इति गम्यते । कर्म [३६५]च न पशुत्वं विनेत्युक्तम् ।

एवमेतेषां प्रमाणविरुद्धानां पक्षाणां निराकरणायाह - **असद्भावे तयो**रित्यादि ।

[३६६]असद्भावे तयोः पुंसां बन्धमुक्ती न जातुचित् ।
भवेतां [३६७]भवतस्ते वै प्रमाणात्प्रतिपत्तितः ॥ १५ ॥

तयोः [३६८]कर्मपशुत्वयोरन्यतरस्या**सद्भावे पुंसां** प्रोक्तन्यायेन **बन्धमुक्ती न जातुचिद्भवेताम्** । इष्यते च भवद्भिः । [३६९]बन्धमुक्ती सर्वात्मवादिनामविवादतो **भवतः** । **ते वै** कर्मपशुत्वे बन्धमुक्त्यन्यथानुपपत्तिलक्षणात्**प्रतिपत्तित** इत्येवं कर्मपशुत्वे समुच्चयतो व्यवस्थापिते ।

इदानीमिदं वक्तव्यम् । [३७०]कियन्ति वस्तूनि जगति वर्तन्ते । तेषु सत्स्वस्य के वा भवन्तीति - [३७१]**कर्माशु[द्धीत्या]**दि ।

obstruction. And because of the absence of bonds there will be no liberation, since that which has not been bound is not liberated.

And to what has been told also, that the bound nature alone may be [the cause of experience], [we answer :] no, because we do not see any bond for the soul liberated through knowledge, even though it has the bound nature. And without bond there is no liberation, since you have told "śiṣyasukhahetur jagadutpattiḥ" which means : the birth of the universe is for the purpose of awakening the disciples to *sukha*, i. e. liberation. It has been told : "there is no awakening without the bodies and instruments named by the word 'universe' and there is no beatitude at all without the awakening; for this purpose there is birth of the universe".

Another says : what is the use to examine these [*karman*, etc. as causes of experience] ? There is bondage of the soul with regard to which the seed of the universe itself starts to be active, and liberation of the soul for which it stops to be active. For what reason does it start to be active ? By its proper nature only. When another cause is not possible, the proper nature is accepted. To this [objection we answer :] on the contrary, the traditionally transmitted texts prescribe acts for the realisation of the fruits. Because the traditionally transmitted texts about acts are accepted as authoritative, we understand that [the seed of the universe] becomes active because of *karman* and stops by the absence of *karman*. And it has been told that there is no *karman* without the bound nature.

In order to reject these views which are conflicting with the means of right knowledge, [the text] says "asadbhāve tayoḥ...".

In the absence of [any] of these two (*karman* and bound nature) the souls would have no bondage or liberation at all. The latter two exist; the former two also, indeed, in virtue of the proof that they are understood [from the former]. 15

In the absence of one of the two, i. e. *karman* and bound nature, the souls would have no bondage and liberation at all, as it has been told previously. And this is desired by you. Bondage and liberation exist, for all upholders of the soul, and no one questions that. "Te vai" i. e. *karman* and bound nature, are proved by the understanding we have of them on the basis of the impossibility otherwise of bondage and liberation. Thus *karman* and bound nature are established coordinately.

Now this has to be told : how many [fundamental] realities are in the universe ? In their presence what does exist [for the soul] with regard to this [universe] ?

There exist *karman*, *mala*, śiva-ness; in their presence there exist,

[३७२]कर्माशुद्धिशिवत्वानि तेषु सत्सु भवन्त्यमी ।
[३७३]त्रयोऽर्थाः सर्वजगतो [३७४]भोगभोक्तृत्वमुक्तयः ॥ १६ ॥

कर्मादीनि जगति वर्तन्ते । तत्र **कर्म** कर्षत्वेन वर्तते, **अशुद्धिः** शिवत्वावरणकत्वेनाधोनियामकत्वेन च वर्तते, **शिवत्वं** दृक्क्रियात्मकं सामर्थ्यं चैतन्यमात्मगुणत्वेन वर्तते । **तेषु** च कर्मादिषु **सत्सु भवन्त्यमी त्रयोऽर्थाः सर्वजगतः** सर्वस्य जन्मवतो जन्तुचक्रस्य यथासंख्येन **भोगभोक्तृत्वमुक्तय** इत्यसाधारणकार्यनिर्देशः । तत्र कर्मणोऽसाधारणं कार्यं भोगः, यतो विज्ञानकेवलस्याशुद्धौ [३७५]शिवत्वे च सत्यपि न भोगोऽस्तीति । अशुद्धेरसाधारणं कार्यं भोक्तृत्वम्, यतः शुद्धशिवत्त्वे सत्यपि विद्यमानमपि कर्म [३७६]तद्भोक्तुं न प्रवर्तते । शिवत्वस्य [३७७]चासाधारणं कार्यं मुक्तिः, यतो मुक्तस्य सर्वज्ञत्वं सर्वकर्तृत्वं च श्रूयते । न च तादृग्विधमचेतनत्वादशुद्धेः कर्मणो वा कार्यं भवितुमर्हति । न ह्यचेतनोपादानः [३७८]चिद्गुणोऽस्ति । शिवत्वस्य वा तत्कथं कार्यं भवत्येव । वृत्तिमतो विकारस्वलक्षणवृत्तिः कार्यम् । शिवस्य वा भावः । पदार्थः शिवाख्यः शिवत्वम् । तच्च जगत्यस्योर्ध्वं [३७९]प्रयोक्तृत्वेन मलस्याधोनियामकत्वेन च वर्तते । तस्य चासाधारणं कार्यं मुक्तिः, [३८०]यतो न तां कुर्वन् पाशात्मकं किंचिदपेक्षते । न चाशुद्धिः [३८१]कर्म वा तां करोति, यतस्तयोः तत्प्रतिबन्धनमेव, नापि जगत्ताभ्यां स्वयमात्मानं मोचयितुं शक्नोति । यदि हि तच्छक्नुयात्, न च योक्तुं भवेत् । अतोऽन्येन बलीयसा जगत्ताभ्यां [३८२][मोमु]च्यत इति । येन च तन्मुच्यते, तच्छिवत्वम् । एतदर्थं चैतत्सूत्रं द्विरूपस्यापि शिवत्वस्य समुच्चयार्थम् ।

इदं प्रासङ्गिकं सूत्रद्वयं व्याख्यातम् । कर्मात्र यत्तत्किंरूपमिति । **कर्म तद्द्विविधमि-त्यादि** ।

कर्म [३८३]तद् द्विविधं भोग्यं धर्माधर्मात्मकं पशोः ।
आभोगस्थायि तद्विद्यात्फलद्वयविरोधि च ॥ १७ ॥

[३८४]सुखदुःखमोहत्वेन परिणतं कर्म भोग्यं । **फलद्वयविरोधी**ति विरोधोऽत्र [३८५]प्रतिबन्धो न विनाशः, धर्माधर्मात्मकं तावदधर्मफलेन धर्मफलेन च बलीयसाधिकेन [३८६]विरुध्यत इति ।

for everyone in the world, three things, experience, agency of experience, liberation. 16

In the universe there is *karman*, etc. *Karman* is present there as attracting [the soul]. *Mala* is present as covering the śiva-ness and maintaining the soul downwards. Śiva-ness which is consciousness or power made of knowledge and action, is present as a quality of the soul. And when "teṣu" i. e. *karman*, etc. are present, there exist, "sarvajagataḥ" i. e. for all the circle of creatures which have births, three things, experience, agency of experience and liberation respectively. Thus here are mentioned the particular respective effects [of the three]. The particular effect of *karman* is the experience, since the soul liberated through knowledge [from *karman*] has no experience, even though the *mala* and śiva-ness are present in it. The particular effect of *mala* is the agency of experience, since even in the presence of pure śiva-ness [the soul] does not set itself into action to experience even the presently existing *karman*. And the particular effect of śiva-ness is liberation, since omniscience and omni-action are revealed for the liberated soul. And such an effect cannot be produced by *mala* or *karman*, because they are devoid of consciousness. That whose material cause is non-conscious is not endowed with the quality of consciousness. Or how is that an effect of śiva-ness ? An effect is a transformation, the proper characteristic of which is alteration, and it belongs to an entity subject to transformation. Or the essence Śiva i. e. śiva-ness is the entity called Śiva. And it is present in the universe as impeller of the soul upwards and as maintainer of *mala* downwards. And its particular effect is liberation, since [Śiva], when giving liberation, does not need anything made of a bond. *Mala* and *karman* do not give liberation, since they are an obstacle to it. Nor the universe by itself can liberate the soul from these two. If it could do that, it would not exist to bind it also. Therefore the universe strives for liberation [of the soul] from these two with the help of another stronger entity. That with the help of which there is liberation is śiva-ness. The present *sūtra* aims at this, i. e. at coordinating śiva-ness under its two forms[72].

These two incidental *sūtras* have been [thus] commented. Of what nature is the *karman* [mentioned] here ? [The text answers :] "karma tad vividham...".

Thus *karman* is of many kinds, an object of experience made of *dharma* and *adharma* for the soul. It should be known as lasting till the experience and obstructed by the two fruits. 17

Karman transformed into pleasure, pain or delusion is an object of experience. "Phaladvayavirodhi" : here *virodha* is obstruction, not destruction : the *karman* made of *dharma* and *adharma* is obstructed by a superior, stronger *adharma* fruit and *dharma* fruit [respectively].

धर्माधर्मयोर्व्याख्यातम् - **धत्ते लोकानिमानि**त्यादि ।

[३८७]धत्ते लोकानिमान्सर्वान् [३८८]प्रीतिं च पुरुषे पराम् ।
[३८९]धर्मस्तेनोच्यते तज्ज्ञैरधर्मस्तद्विपर्ययात् ॥ १८ ॥

लोकान् [३९०]दर्शनसंप[द्यु]क्तान्प्रकाशांस्तज्जातीयेषु भोग्येषु **धत्ते** धरणं करोतीति धर्मः । अधर्म**स्तद्विपर्ययात्** तद्विपर्ययसाधनान्न धर्मः । नासौ लोकान्धत्ते नापि च [३९१]प्रीतिं, किंत्वलोकानसात्त्विकान्राजसांश्च तज्जातीयेषु भोग्येषु धत्ते, अप्रीतिं च दुःखमोहात्मिकां धत्त इति ।

धर्मसाधनसंवित्तिरित्यादि ।

[३९२]धर्मसाधनसंवित्तिराम्नायादेव जायते ।
[३९३]तन्मूलत्वात्स्मृतेः चैव ताभ्यामेव परस्य च ॥ १९ ॥

आम्नायादेवेत्यवधारणं [३९४]कथम्, यतः स्मृतेरपि जायते । स्मृतेरप्याम्नायमूलत्वादाम्नायादेवेत्यदोषः । ताभ्यामेव श्रुतिस्मृतिभ्यां परस्याधर्मस्य [३९५]साध[न]संवित्तिर्जायत इति प्रतिषेधार्थं चैतत् । शैवेऽपि कर्मोक्तं तदपि कर्मसामान्यात् संसारहेतुरिति प्रसक्तम् । तन्निषेधायेदमाह - यस्य [३९६]साधनसंवित्तिराम्नायात्स्मृतेश्च जायते तत्कर्म [३९७]संसारहेतुरिति । स्मृत्याम्नायग्रहणं च समस्तपशुदर्शनार्थम् ।

किं पूर्वस्मिन्कर्मण्यशेषप्रलीने सत्युत्तरमुत्पद्यते, इतः पूर्वस्मिन्नुपभुज्यमान एवेति । [३९८]**उन्नत्यवनती** इत्यादि ।

[३९९]उन्नत्यवनती [४००]यद्वत्तुलाकोटयोर्व्यवस्थिते ।
[४०१]कर्मणोर्विलयोत्पत्ती तद्वदुत्तरपूर्वयोः ॥ २० ॥

पूर्वस्मिन्नुपभुज्यमान एवोत्तरमुत्पद्यत इति यावत् । यतश्चैकस्मिन्कर्मण्युपभुज्यमानेऽन्यदुत्पद्यते, अन्यस्मिंश्चान्यत्, तेनेदं कर्म संतानत्वादावलीभूतं दृष्टमिति ।

[Karman is now] commented in its *dharma* and *adharma* forms : "dhatte likān imān..."

Knowers call *dharma* that which bears all these lights and the highest happiness in the soul, *adharma* the contrary. 18

Dharma is that which "dhatte" i. e. does the action to bear "lokān" i. e. the lights connected with the richness of knowledge with regard to the objects of experience of same class. "Adharmas tadviparyayāt" : *adharma* is that which is not *dharma* because it is the instrument of realisation of the contrary; it does not bear light, nor happiness, but non-light, non-*sattva*, *rajas*, with regard to the objects of experience of the same class; it bears non-happiness which is pain and delusion.

"Dharmasādhanasaṃvittiḥ...".

The knowledge of the means of realising *dharma* is born from the traditionally transmitted texts only, and also from *smṛti*, because the latter is based on the former; and from the same sources derives the knowledge of the other (*adharma*). 19

How is this restrictive delimitation "āmnāyād eva",done, since [the knowledge of dharma] arises also from *smṛti* ? There is no defect in this, since *smṛti* is based on the tradition, [the knowledge of *dharma*] arises from them only. "Tābhyām eva" i. e. from the same tradition and from *smṛti* arises the knowledge of the means of realising "parasya" i. e. the *adharma*. And this knowledge aims at prohibiting it. [One could object that :] the act mentioned in texts revealed by Śiva, since it shares with others the quality to be an act, risks to be a cause of transmigration. In order to reject this [the text] says that the act, the knowledge of the means of which arises from tradition and *smṛti*, is a cause of transmigration. And the mention of tradition and *smṛti* intends to mean all the views of bound souls.

Does the ulterior act arise when the anterior act is completely destroyed, or when the anterior act is being experienced ? [To this the text answers :] "unnatyavanatī...".

The rise and destruction of the ulterior and anterior acts are established like the movements upwards and downwards of the poles of a scale. 20

The meaning is : when the anterior act is being experienced, the ulterior one arises, because, when one act is being experienced another arises, and when the latter is being

किमियं कर्मावली [४०२]पू[र्वान्तोपे]ता, उत नेति । इयं चैतन्यस्य व्यञ्जिका, [४०३]अन्याशुद्धिवदावारिका । कुतो बन्धाख्यया प्रोच्यत इति [४०४]च । **असंस्थे**त्यादि ।

असंस्था मुक्तिपर्यन्ता [४०५]द्विकर्मप्रतिरोधतः ।
प्रोच्यते[४०६]ऽसावणोर्बन्धः सुकैवल्यनिरोधिका ॥२१॥

नास्याः संस्था प्रतिष्ठा पूर्वान्ता विद्यत इति । किमेवं परान्तोज्झितापि । न, **मुक्तिपर्यन्ता** । सुकैवल्यं शिवसमानता, तन्निरोधिका । इयं बन्ध इति प्रोच्यते । एतदस्याः खल्वशुद्ध्या सह साधर्म्यम्, यतो यावदियं नोपभुक्ता [४०७]नि[र्जी]र्णा वा तावत्सुकैवल्यं न भवत्येवेति । [४०८]मायापि चैतन्यस्य व्यञ्जिका न, अशुद्धिवदाच्छादिका । सापि सुकैवल्यनिरोधिकैव बन्ध इति प्रोच्यते । यतो यावन्मायावदसावपि साधिकारा तावत्सुकैवल्यं न भवत्येवेति, अत उच्यते चाविशेषेण बन्धत्रयस्याप्येतदेव बन्धत्वम् । परासंस्थानिरोधकमिति परा संस्था [४०९]सुकैवल्यम्, तन्निरोधकमिति । किमर्थमवधार्यते - यावदियं द्विरूपाधिकारता तावत्सुकैवल्यं न भवत्येवेति । **द्विकर्मप्रतिरोधतः** । यतोऽवश्यं [४१०]द्विरूपनिरधिकारानन्तरमेव सुकैवल्यं भवतीति ।

इदानीमशुद्धेरस्य चाधिकारस्य [४११]साध[र्म्यं] वैधर्म्यं चाह - **अनादिः पौरुषी**त्यादि ।

[४१२]अनादिः पौरुषी कारा मुक्त्यन्ताविकृता निजा ।
[४१३]मायेया कार्मिकी नैव मुक्त्यन्तापि विधर्मतः ॥ २२ ॥

[४१४]नास्या आदिरुत्पत्तिर्विद्यत इत्य**नादिः** । **पौरुषी** पुरुषगुणनिरोधकत्वेन वर्तत इति । **कारा** बन्धनमशुद्धिः । **मुक्त्यन्ता** नात्रान्तो विनाशः किं तु कारात्वनिवृत्तिः, अनादित्वात् । मायावत्प्रसवधर्मिणी मा भूदिति । **अविकृता** न कार्यात्मना विक्रियते । **निजा** सहजा

experienced another arises. Thus this *karman* appears to be a chain, since it is a lineage [of acts].

Is this chain of acts endowed with an anterior limit, or not ? Is it a factor of manifestation of consciousness, or of covering [of the same] like another *mala* ? Why is it called by the denomination of bond ? [To these questions the text answers :] "asaṃsthā...".

This [chain of acts] has no [initial] base and ends in liberation; it is called a bond of the soul, it obstructs the true liberation, because of the obstruction done by the two *karmans*. 21

For this [chain of acts], there is no "saṃsthā" i. e. an establishment, an anterior limit. Is it in the same way devoid also of an ulterior limit ? No, it ends with liberation. It is obstructing *sukaivalya* i. e. the similarity with Śiva. It is called 'bond'. This is, indeed, its similarity with *mala*, because as long as it is not completely experienced or without seed [of further acts], liberation does not occur. *Māyā* also is not a factor of manifestation of consciousness, it is a factor of covering, like *mala*. *Māyā* also obstructs the true liberation and is called a 'bond'. Because as long as, like *māyā*, this [chain of acts] is active, true liberation does not occur, for this reason the nature of bond is mentioned for the three entities (*karman, māyā, mala*) without differentiation. [The nature of bond is told to be] "parāsaṃsthānirodhakam"[73] i. e. obstructing the *parāsaṃsthā* namely the true liberation. Why is it concluded that as long as there is activity in the two forms [of *karman*] there is no liberation ? That is "because of the obstruction done by the two *karmans*"[74] : because, necessarily, only after the two forms of *karman* are without activity, liberation occurs.

Now [the text] says the similarity and the difference of the *mala* and of this activity [of karman] : "anādiḥ pauruṣī...".

***Mala* is without beginning, resides in the soul, ends in liberation, is without transformation, innate; it is not born from *māyā* and from activity, even though it ends at the time of liberation, because of its dissimilarity. 22**

"Anādiḥ" means : which has no "ādiḥ" i. e. birth. "Pauruṣī" means : which resides [in the soul] as obstructor of its qualities. "Kārā" means a bond, i. e. the *mala*. "Muktyantā (ending in liberation)" : the end here is not destruction, but the cessation of the nature of bond, because *mala* has no beginning. *Mala* should not be subject to procreation, like *māyā*; [therefore the text says :] "avikṛtā" i. e. which is not transformed into products.

नागन्तुका । एतदुक्तं भवति - अनादिसंबन्धत्वादामुक्तेर्न वियुज्यत इति । **मायेया कार्मिकी नैव** - मायातत्त्वजन्या मायेया, कर्म व्यापारः तज्जन्या कार्मिकी । नन्वियं [४१५]द्विरूपा मुक्तयन्ता । सत्यम्, मुक्तयन्तापि [४१६]स[ती] विधर्मतो नैवंविधा ।

किं मुक्तयन्तत्वातिरेकेण । अन्यतः [४१७]पूर्वाद्वा मुक्तित्वं बन्धत्वं च ।

[४१८]प्रकरणोपसंहारायाह **मायेयमित्यादि** ।

[४१९]मायेयमाणवं कार्ममेतावदणुबन्धनम् ।
एतच्चोक्तं मया सर्वं संक्षेपात् कनकाण्डज ॥ २३ ॥

इदानीं [४२०]त्रिविधबन्धनमनूद्य तस्य च यद्बन्धत्वं तद्विमुक्तये शिवादुपायः प्रवृत्तस्तमाह **तस्मात् प्रविततादित्यादि** ।

[४२१]तस्मात्प्रविततात् बन्धात्परासंस्थानिरोधकात् ।
दीक्षैव मोचयत्यूर्ध्वं शैवं धाम नयत्यपि ॥ २४ ॥

दीक्षैवेत्यवधारणमवबोधादिनिवृत्त्यर्थम् । [४२२]एतावता ये पशुमतप्रोक्ता ते पाशव्यङ्ग्यत्वात् पाशरूपत्वाच्च [४२३]नास्यार्थस्य साधका इत्युक्तम् । येऽप्यत्रोक्तास्ते दीक्षाङ्गत्वप्रसिद्धया प्रतिपाद्यन्त इत्यवधारितदीक्षैवेति । [४२४]शैवं धाम शिवधाम तत्तुल्यं धाम तेज इति शिवत्वं तत् । नयति प्रापयति तदस्य व्यनक्तीति ।

शिवधामेत्यादि

[४२५]शिवधामार्पितस्यास्य भोगभोक्तुर्न जातुचित् ।
भोक्तृत्वमधिकारित्वं [४२६]पतिकृत्यानुकारिता ॥२५॥

"Nijā" i. e. innate, non-adventitious. This has been told : "because it has a beginningless relation, it is not separated [from the soul] before liberation". "Māyeyā kārmikī naiva" : [it is not the impurity] *māyeyā* i. e. born from the essence *māyā*, nor *kārmikī* i. e. born from *karman*, namely activity. One could object that [this chain of acts] of two forms [*dharma* and *adharma*] ends at the time of liberation [and, therefore, the *mala* is not different]. [We answer that] it is true, but [the *mala*], even though it ends at the time of liberation, is not the same [impurity] because of its different properties. What is the use,[one could again object,] to differentiate it by the property to end at the time of liberation ? [We answer that without this difference] it would be the state of liberation and a bond [at the same time] in other conditions [than the present state of bondage, i. e. after liberation] or before [liberation].

In order to conclude the present subject [the text] says : "māyeyam...".

The bondage of the soul is made only by *māyā*, *mala* and *karman*. And this has been told by me in a short form, O God born of the golden egg. 23

Now, after reminding the threefold bond and its nature of bond, [the text] says the means received from Siva to be freed from it : "tasmāt pravitatāt...".

***Dīkṣā* alone rids [the soul] from this protracted bond obstructing the higher liberation, and leads upwards to the light of Siva. 24.**

The exclusive determination [expressed by *eva* in] "dīkṣaiva" aims at excluding knowledge, etc. By that much it is told that the [means of liberation] propounded in the doctrines of bound souls, are not means to realise this end, because they are manifested by bonds and consist of bonds. Those which are propounded in the present [śaiva] doctrine, are mentioned because they are well-known as ancillaries to the *dīkṣā*. Thus the exclusively determined *dīkṣā* [is the means of liberation]. "Saivaṃ dhāma" means "dhāma" the light of Siva, i. e. similar to [the radiance of] Siva; it is the śiva-ness [of the soul]. [The *dīkṣā*] "nayati" leads to that [śiva-ness], i. e. manifests the śiva-ness of the soul.

"Sivadhāma...".

For this agent of experience to whom Siva's radiance has been brought, there is no more state of experiencer, nor of having a function, nor of acting under Lord's will. 25

For this soul agent of experience who is "śivadhāmārpitasya" i. e. whose

शिवधाम शिवत्वं [४२७]तदर्पितमभिव्यञ्जितमस्येति अस्य भोगभोक्तुः पुरुषस्य शिवधामार्पितस्य सतो न जातुचिद् भोक्तृत्वादयो भवन्तीति । भोक्तृत्वं भोगक्रियाकर्तृत्वं [४२८]यत्सकलस्य दृष्टं तत् । अधिकारित्वं च यत्प्रलयकेवलस्य च विज्ञानकेवलस्य च दृष्टम् । पतिकृत्यानुकारिता [४२९]या सकलात्प्रभृत्यनन्तेशं यावद् दृष्टवतीकृत्यादौ पश्चात्कारित्वं कारिता । पत्येच्छामात्रेण प्रवृत्ते सतीदं [४३०]कर्म कुर्वन्तीत्यनन्तरं ये प्रवर्तन्ते पतिकृत्यानुकारिणां तेषां भावः पतिकृत्यानुकारिता । स्वेच्छारहितव्यवहारित्वमिति यावत् ।

अत्र कारणमाह - **भवोद्भवे**त्यादि ।

भवोद्भवपदातीतो [४३१]निष्कम्पार्चिरिव स्थितः ।
मुक्तो व्यक्तशिवत्वोऽसौ कृतकृत्यो यतस्ततः ॥ २६ ॥

इति [४३२]स्वायम्भुवसूत्रसंग्रहे [४३३]पाशविचारपटलो द्वितीयः ॥

[४३४]**भवपदं** सर्वमेव कलायुक्तमणुत्वं [४३५]प्रलयाकल[त्वं] मायातो भवनार्हत्वा-द्भवपदम्, विज्ञानकेवलत्वमधो भवति शुद्धविद्यात इति भवपदम् । [४३६]तस्मादूर्ध्वं यद्भवति तत्सर्वमेव मनुनाथाद्यनन्तान्त**मुद्भवपदम्** । तदतीतोऽयम् । तत्र च पदद्वये प्रोक्तव्यवहारित्वमस्ति [यत्] तदतीतत्वात् । अयं दीक्षितो [४३७]देदीप्यमानो निष्कम्पार्चिरिव स्थितः । कुतो भवपदातीतः । यतो [४३८]मुक्तः सर्वबन्धनैः । कुतश्चोद्भवपदातीतः । यतो व्यक्ता-शेषशिवत्वोऽसौ । अत एव च **कृतकृत्यो** निष्पादितप्रयोजनः । नैतत्संबन्धि किंचित् पुनः पत्युः कर्तव्यमस्ति । यतश्च कृतकृत्यस्ततो न जातुचित्तस्य भोक्तृत्वादयो न भवन्तीति ॥

इति स्वायम्भुवसूत्रसंग्रहे द्वितीयस्याध्यायस्य सद्योज्योतिष्कृता टीका समाप्ता ॥

"śivadhāma" namely its śiva-ness "arpitam" i. e. has been manifested, the states of experiencer, etc. do not exist anymore. *Bhoktṛtva* is the quality of agent of the action to experience which is seen for the *sakala* soul. *Adhikāritva* (state of having a function) is seen for the soul liberated at the time of *pralaya* and the soul liberated through knowledge. "Patikṛtyānukāritā" means : *kāritā* i. e. Lord's quality to make [the souls] from the *sakalas* upto Ananteśa act [*anu* i. e.] after having made them to know initially[75]. [Or] "patikṛtyānukāritā" means the quality of the *patikṛtyānukārins* i. e. those who act after [having understood] that they accomplish any action when it has been set in motion by the Lord through his mere desire[76]; the meaning is thus : the quality of those who do not act according to their own desire.

[The text] says the cause of that : "bhavodbhava-...".

[The soul which has received *dīkṣā*] has gone beyond the worlds of *bhava* and *udbhava* and, there remains similar to a flame which does not tremble, because it is liberated, it has its śiva-ness manifested, it has accomplished its task. 26

"Bhavapada-" : all that which is united with *kalā*, i. e. the nature of bound soul and the nature of soul liberated at the time of *pralaya*, because that which is fit to be born from *māyā* is "bhavapada (world of births)"; the nature of soul liberated through knowledge, because it is below the essence *śuddhavidyā*, is also *bhavapada*. All that which is above, from the lord of *mantras* upto Ananta, is "udbhavapada-". [The soul which has received *dīkṣā*] is beyond that, because it is beyond the property to have the activity prescribed in these two domains. This soul which has received *dīkṣā*, intensely shining, stays there like a flame which does not tremble. Why is it beyond the domain of *bhava* ? Because it is set free from all the bonds. Why is it beyond the domain of *udbhava* ? Because its full śiva-ness is manifested. It is, therefore, "kṛtakṛtyaḥ" i. e. it has accomplished its aim. There is nothing more in connection with this aim, which has to be executed for the Lord. Because this soul has accomplished its aim, it has no more nature of experiencer, etc.

तृतीयः पटलः

[४३९]अनुग्रहशक्तिः

प्राग् ज्ञानं प्रवर्तत इत्यनेन शक्तिः संसूचिता, [४४०]यतो वक्ष्यति या शक्तिर्देवदेवस्य ज्ञानं सैवेति । पुरापि [४४१]च शिवेच्छया पुरानन्तेत्येवमादिना शक्तिरुक्ता । अतो [४४२]मलीकरणादि शिवसायुज्यान्तं पुरुषार्थकारित्वप्रधानत्वात् प्रधानं शक्तिः । ततश्चासौ सर्वात्मना परिज्ञाता, तया च ज्ञातया शक्तिमान् [४४३]ज्ञात एवेति । तस्य तादृग्विधा शक्तिः का [क]स्यासौ, किंविशिष्टा शक्तिश्चेति । अथ [४४४]**देवादिदेवस्ये**त्यादि ।

अथ देवादिदेवस्य [४४५]शिवस्यामिततेजसः ।
[४४६]सर्वानुग्राहिका शक्तिरमोघा बलशालिनी ॥ १ ॥

[४४७]**अथे**त्यादिसूत्रोपन्यस्तात्मादिशिवत्वसन्तानार्थान् व्याख्यायानन्तरं तत्रैव ज्ञानशब्देन संसूचिता शक्तिर्व्याक्रियत इति । **सर्वानुग्राहिका** सर्वेषां [४४८]चेतनानामचेतनानामनुग्राहिका [४४९]उपोद्बलिका । तथानुगृहीतानि यानि तानि स्वकार्यनिष्पत्तौ [४५०]समर्थितानि भवन्ति । [४५१]ननु तिरोभाविकापि शक्तिः परिदृश्यते । सत्यम्, तिरोभावस्यानुग्रहं [४५२]कुर्व[ती] पुंसस्तिरोभावेत्युच्यते । न पुनः कस्यचित् [४५३]तिरोभावाय शक्तिः प्रवर्तत इति ।

किं **चैकानेकविभागेने**त्यादि ।

एकानेकविभागेन संस्थितासौ शिवेच्छया ।
विद्याविद्येश्वरेशानी भाति [४५४]सादिभवे पदे ॥ २ ॥

यथा ह्येका सवितुर्दीधितिः प्रकाशविकासित्वधर्मिकाब्जमुकुलसंबन्धात् [४५५]तत्प्रकाशयन्ती प्रकाशिकेत्युच्यते, यदा तत्संबन्धात्तदेव परिपाकगतं विकासयति तदा [४५६]विकासिकेत्युच्यते,

III. THE POWER OF GRACE

Sakti (power) has already been well indicated by "jñānaṃ pravartate ([from Siva] knowledge proceeds)" (I. 2d), since [the text] will say "that which is the *śakti* of the god of gods, that itself is knowledge" (V. 4). And even before, the *śakti* has been mentioned by "śivecchayā purānantā... (by Siva's desire the infinite, primordial [*Sakti*]...)" (I. 16). Because it consists mainly of [Siva's] property to impel [the souls] to act for their aims, from binding the soul to *mala* upto granting liberation, the *śakti* is a main entity. And, therefore, [if] it is known through all its nature, through it, once it is known, the possessor of the *śakti* is known. Who is the *śakti* ? To whom does it belong ? And how is it characterised ? [The text answers :] "atha devādidevasya...".

Now, the prime god of gods, Siva whose effulgence is immeasurable, has a *śakti* which gives grace to all, efficient, endowed with force. 1

After explaining the subjects, from the soul upto the śiva-ness, mentioned in the formulae "atha..." (I. 2), [the text] explains the *śakti* indicated by the word *jñāna*, "knowledge" in the same formula. "Sarvānugrāhikā" : "anugrāhikā" i. e. which gives strength "sarveṣām (to all)" i. e. to conscious and unconscious beings. The beings thus favoured with grace become able to accomplish their actions. But one may object that the *śakti* appears also to be obscuring [the faculties of the soul][77]. [We answer :] that is true, the *śakti* accomplishing the grace to obscure the soul is called "obscuring". But the *śakti* does not enter into action to obscure any soul.

Moreover "ekānekavibhāgena...".

This unique [*śakti*] is well-established in manifold divisions, following Siva's desire; she rules the Lords of *vidyās* and *avidyās*; she shines in a domain which is ahead of *bhava*. 2

One and same ray of the sun, which has the property to shed light and to open [flowers], being in contact with a lotus-bud, sheds light upon it and is, therefore, called 'illuminator'; but when the bud has reached maturity and when, being in contact with it, it opens it, then it is called 'opener'. In the same way the one and same *śakti* of Siva, who

एवमेकैव शिवशक्तिर्ज्ञानक्रियाधर्मिकार्थेषु संबन्धात्तान् [४५७]प्रज्ञापयन्ती ज्ञानमित्युच्यते, यदा तत्संबन्धात्तेषां धात्वर्थविलक्षणोत्क्षेपणादिलक्षणवत्क्रिया भवति तदा क्रियेत्युच्यते । एकापि **सत्यनेकविभागेन संस्थितासौ** यावच्चेतनाचेतनं वस्तुजातं तावता भेदेन [४५८]संस्थिता, यावच्च सर्गस्थितिसंहारतिरोभावानुग्रहाख्यं सन्तानभेदं [४५९]कृत्यजातं तावता भेदेन संस्थिता, यच्च पुमर्थसाधनं शिवस्य कायादि तावता भेदेन संस्थिता । **शिवेच्छये**ति [४६०]पूर्व[मे]वास्येच्छाख्यायाः शक्तेर्व्यापारो भवति, अनन्तरं च शक्तिरनेकविधा विभागेन संतिष्ठत इति, अतो व्यापाराणां क्रमवत्त्वाच्छिवेच्छया प्रयुक्ता शक्तिरनेकविभागेन संस्थितेत्युच्यते ।

नन्विच्छातोऽन्या शक्तिः, [४६१]अनन्तेत्यादि सूत्रविरोधः । सा च परिणामिनी । परिणामित्वेऽचेतनत्वादिदोषदुष्टा, न चेद् [४६२]अनेकधापरिणामित्वाच्च । उपचारतोऽनेकविभागेन संस्थिता न मुख्यतः । किमत्रोपचारबीजमिति [४६३]**विद्याविद्येश्वरेशान्या**दि । विद्याः सप्तकोटिसंख्याता मन्त्राः, अविद्याः सर्व एव पाशाः, केचिच्च पशव ईश्वरास्तासामेव विद्याविद्यानाम् । ते च द्विरूपाः, शुद्धा अशुद्धाश्च । शुद्धा विद्येश्वराः, अशुद्धा अविद्येश्वराः पशव एव भुवनपतयः । तेषामीशानी तानधिष्ठाय [४६४]चेष्टयति प्रवर्तयतीत्यधिष्ठा[न]भेदात् शक्तेर्भेदः । तांश्चाधिष्ठाय [४६५]सर्गादीनि कृत्यानि करोतीति कृत्यभेदात् पुनर्भेदः । अधिष्ठातृत्वादेव ज्ञानपूर्वकत्वदर्शनाद्यावन्तश्चामी [४६६]क्रियाशक्तेर्भेदास्तावन्तो ज्ञानशक्तेरपि द्रष्टव्याः । यावन्तश्च शक्तेर्भेदाः [४६७]तावन्तस्तदवियुक्तत्वात् शिवस्यापि वेदितव्याः । [४६८]कायेन्द्रियादिमतोऽधिष्ठातृत्वदर्शनात् शिवस्य कायेन्द्रियादिभेदेन पुनः शक्तिर्भिद्यते । अत एव सकलः शिवः शक्तिकलायुक्तत्वात् । परमार्थतस्तु [४६९]निष्कलः पाशकलासंसर्गशून्यत्वात् ।

[४७०]भवोद्भवपदार्थतो भेदितत्वात् तदन्तःपातिनी शक्तिर्मा भूदिति । **भाति सादिभवे**

has the property of knowledge and action, is called 'knowledge', when, being in contact with objects, she gives knowledge of them; and she is called 'action', when through the same contact she is action with regard to them, being different from the activity signified by verbal root and having such characteristics as pushing upwards, etc.[78] Though it is unique, it is well-established in manifold divisions, i. e. it is established in as many divisions as there are classes of conscious and unconscious things; and it is established in as many divisions as there are actions, differentiated by the order of their sequence, called creation, maintenance, resorption, obscuration and grace; it is established in as many divisions as there are means of realisation of the soul's aims, for instance, a body, etc. for Śiva. "Śivecchayā" : in the beginning there is activity of the Lord's *śakti* called 'desire'; then the manifold *śakti* establishes itself in divisions; therefore, because actions have a sequence in time, when it is impelled by Śiva's desire, the śakti is told to be established in manifold divisions.

One could object : [thus] the *śakti* is different from the desire; this is conflicting with the *sūtra* "...anantā... [by Śiva's desire that] infinite [primordial *śakti* comes to the soul]" (I. 16)[79]. And [in that case] it is subject to transformation. If it is subject to transformation it is vitiated by the defects of non-conscious nature, etc., since, if it is not [non-conscious], it is not subject to multiple transformations. [One answers that the *śakti*] is established in manifold divisions through false superimposition, not as a reality. [But] what is the source of the false superimposition in this case ? [The author] says it in "vidyāvidyeśvareśānī". The *vidyās* are *mantras* numbering seven crores. The *avidyās* are all the bonds. A few souls are Lords of all these *vidyās* and *avidyās*. They are of two kinds, pure and impure. The pure ones are the Vidyeśvaras, the impure ones are the Avidyeśvaras, who are bound souls, the Lords of the worlds. She is their "īśānī" i. e. residing in them she sets them into motion, she makes them to act. Thus through the difference of her locations the *śakti* is differentiated. And residing in them (Vidyeśvaras, etc.) she accomplishes creation, etc. Thus through the difference of her actions she is again differentiated. Because of her nature of resident [in many Vidyās, etc.], since one sees that action is always preceded by knowledge, one should see as many differentiations of the *śakti* of knowledge, as there are for the *śakti* of action. And because Śiva is never non-connected with the *śakti*, we should understand that he has as many differentiations as his *śakti*. Because Śiva is seen to reside in beings having a body, sense-organs, etc., by the difference of these bodies, sense-organs, etc. of Śiva his *śakti* is again differentiated. Thus Śiva is possessed of parts because he is united with the parts of his *śakti*. But the ultimate truth is that Śiva is without parts, because he is devoid of any association with the parts of the bonds.

The *śakti* should not be included in *bhava* and *udbhava*[80], because she receives a

पदे । भवोद्भवपदयोरादौ भवतीति । शिवः शक्तिः शिवसायुज्यगाश्चेत्येतदादिभवपदम् । “भाति सातिभवे पदे” इत्यपरः पाठः । भवोद्भवपदे अतीत्य भवतीति । तदेव शिवाद्यतिभवमुच्यते । [४७१]“भाति सैवोद्भवे पदे” इत्येकेषां पाठः । तथापि [४७२]भवपदादूर्ध्वं भवतीति प्रभवतीत्यनेन साधर्म्येणातिभवपदमेव विवक्षितम् ।

सर्वानुग्रा[हि]का सर्वेषां चेतनाचेतनानामनुग्राहिकेति [४७३]किलानुग्रहशक्तिरेव विवक्षिता । सा मन्त्रमन्त्रेश्वरेशानीत्वेनोद्भवपदे संस्थितत्वादेकापि सत्यनेकविभागेन भातीति केषांचिद्व्याख्यानम् । अनेन तु लभ्यमानोऽनेकार्थः परित्यक्त [४७४]इत्यपरं व्याख्यानम् ।

एतदेवं शक्तेः सर्वाधिष्ठातृत्वमुक्तम् । इदानीं वक्तव्यम् । किं सर्वेषु साक्षात् शिवशक्तिः संबध्यते, उत केषुचित् साक्षात् केषुचिद् [४७५]द्वारतयेति । येषु च संबध्यते तेषां कमुपकारं करोतीति । **तयोद्दलितसामर्थ्या** इत्यादिसूत्रत्रितयम् ।

[४७६]तयोद्दलितसामर्थ्याः सर्वस्य प्रभविष्णवः ।
अनन्तेशादिविद्येशा बभूवुः कारणेच्छया ॥ ३ ॥
तेभ्योऽ[४७७]मितबलाश्चान्ये तेभ्यश्चान्ये नियोगिनः ।
भवन्ति विमलात्मानः सितासितफलप्रदाः ॥४॥
[४७८]तेभ्योऽपि साञ्जनाश्चान्ये पतीच्छानुविधायिनः ।
[४७९]येभ्यो निखिलमुत्पन्नं जगत्स्थावरजङ्गमम् ॥५॥

अनन्तादिषु साक्षात्संबध्यते । इतरेषु [४८०]द्वारतयेति । तया कारणेच्छयो**द्दलितसामर्थ्याः** [४८१]समर्थितसामर्थ्या अनन्तेशादयो मायातीता विद्येशाः **सर्वस्य** सितासितस्यार्थराशेः **प्रभविष्णवः** प्रभवनशीला बभूवुरित्ययमुपकारः ।

तेभ्योऽनन्तादिभ्यः तद्द्वारेण तया कारणेच्छयोद्दलितसामर्थ्याः सन्त **अमितबलाश्चान्ये**

differentiation from these two entities. [The author says this in :] "bhāti sādibhave pade". [It means :] this *śakti* is ahead with regard to the domains of *bhava* and *udbhava*[81]. The domain ahead of *bhava* is Siva, *śakti* and the liberated souls. There is another reading : "bhāti sātibhave pade". [It means :] the *śakti* is beyond the *bhava* and *udbhava* domains. The same Siva, *śakti* and liberated souls are called *atibhava*. Some read : "bhāti saivodbhave pade". Even then [the word *udbhava* means :] that which is above the *bhava*, domain[82]; thus *udbhava* is that which dominates [the other domains]; because of this common property the *atibhava* domain is intended here.

Some make the following comment : "sarvānugrāhikā" (III. 1c) [means :] she who gives grace to all the conscious and non-conscious beings. Thus, indeed, the *śakti* of grace is intended here. This *śakti*, because she is established in the *udbhava* domain, since she rules Mantras and Mantreśvaras, though she is unique, appears with many divisions. But many meanings which are obtained here are left over. Therefore the other comment [is preferred].

This property of the *śakti* to be ruling resident everywhere has been thus told. Now the following matter has to be told. Is Siva's *śakti* connected directly with all the beings, or directly with some, through intermediaries with others ? And what help does she give to those with whom she is connected ? The three formulae beginning with "tayodbalitasāmarthyāḥ" [answer to this question].

Some souls had their power strengthened by [Siva's] desire to make them act and became able to dominate everything; they are the Vidyeśas, Ananta, etc., then others than them, whose power is unmeasurable, then others than these, who are under the order [of the previous ones], souls without *mala* who give pure and impure fruits, then others than these affected with *mala*, accomplishing the desire of the Lord and from whom is born the whole world of moving and unmoving beings. 3-5

[Siva's *śakti*] is directly connected with Ananta, etc., but through an intermediary with other beings. The Vidyeśvaras, Ananta, etc. who are beyond *māyā*, being "udbalitasāmarthyāḥ" i. e. whose power has been strengthened by this [Siva's] desire to make them act, have become "prabhaviṣṇavaḥ" i. e. endowed with the command over "sarvasya" i. e. the mass of pure and impure objects. This is the help [extended to them by Siva's *śakti*].

Other than "tebhyaḥ (them)" i. e. Ananta, etc. [who are beyond *māyā*], are the Vidyeśas who stand in the realm of *māyā* and who give the pure and impure fruit; they are of unmeasurable power, as they had their power strengthened by [Siva's] desire to make

मायामण्डलस्था विद्येशाः [४८२]सितासितफलप्रदा भवन्ति । **तेभ्यश्चा**नन्तेशादिभ्यो मायादिमण्डल-स्थेभ्यस्तद्द्वारेण तया कारणेच्छयोद्बलितसामर्थ्याः सन्तोऽन्ये **नियोगिनो** [४८३]विद्येशनियोगभाजः सप्तकोटिसंख्याता मन्त्रा विमलात्म[ा]नो निरञ्जनाः **सितासितफलप्रदा** भवन्ति । सितं शुद्धमुद्भवपदे यत्फलम् । असितमशुद्धं भवपदे यत्फलम्, तत्प्रदा भवन्तीति । [४८४]विमलात्मकत्वं पूर्वेष्वपि द्रष्टव्यम् ।

तेभ्योऽपि त्रिभ्यो वर्गेभ्यः तद्द्वारेण **साञ्जनाश्चान्ये** भुवनपतयः पतीच्छानुविधायिनो भवन्ति । पतीच्छानुविधायिभ्यः सद्भ्यो **येभ्यो निखिलमु**त्पन्नं जगत्स्थावरजङ्गमम् । [४८५]तद्द्वारेण जगति शक्तिर्निपततीति यावत् ।

इदानीं शक्तेः कार्यमुच्यते - **प्रभुशक्तेरि**त्यादि ।

[४८६]प्रभुशक्तेः समुत्पन्ना मन्त्राश्चामोघशक्तयः ।
शिवेच्छयैव चेष्टन्ते शिवान्ते [४८७]विततेऽध्वनि ॥६॥

प्रभोः पत्युः [४८८]प्र[भ्वी] च सर्वाधिष्ठात्री शक्तिस्तस्याः समुत्पन्ना मन्त्राः । पूर्वमणूनां सर्वज्ञत्वसर्वकर्तृत्वलक्षणं मन्त्रत्वं शिवसंज्ञितं मलेन प्रच्छादितम् । तत् प्रभुशक्तया मलं [४८९]विदार्य तेषामाविर्भावितमिति । अतः **प्रभुशक्तेः समुत्पन्ना मन्त्रा** [४९०]इत्युच्यते । चकारोऽत्र समुच्चयार्थे । [४९१]परमन्त्रा मन्त्रेश्वरा वा मन्त्राश्चेति यावन्तो मननत्राणरूपा मन्त्रा मन्त्रनायकास्तावन्तः प्रभुशक्तेरेवेति । असावप्यवधारणार्थोऽयं मन्त्रशब्दः । अनन्तेशादिविद्येशेभ्यः प्रभृति यावन्नियोगिनो मन्त्रास्तावत् प्रभुशक्तित एवेति साञ्जनव्युदासः । [४९२]ननु तेऽपि प्रभुशक्तित उत्पन्नाः । सत्यम्, न पुनः प्रभुशक्तित एव, यतस्ते पाशेभ्यः प्रभुशक्तितश्चोत्पन्नाः, [४९३]मन्त्रमन्त्रेश्वरास्तूक्तेन न्यायेन प्रभुशक्तित एवेति ।

तेन चोत्पन्नाः सन्तस्तया प्रभुशक्तयाख्यया **शिवेच्छयै**वाधिष्ठिताः **चेष्टन्ते** । नन्विदमुक्तमेव "तयोद्बलितसामर्थ्याः" इत्यादिना । तत्र शिवेच्छया प्रेर्यत्वमुक्तम्,

them act, through the mediation [of the afore-said Ananta, etc.]. Other than "tebhyaḥ" i. e. Ananteśa, etc. who stand in the realm of *māyā*, are the Mantras; they had their power strengthened by this [Śiva's] desire to make them act, through the mediation [of these last mentioned Vidyeśas]; they are "niyoginaḥ" i. e. serving the order of the Vidyeśas; they are numbering seven crores; they are "vimalāt[mā]naḥ" i. e. without *mala*, and "sitāsitaphalapradāḥ" : the *sitaphala* is the pure fruit which is in the *udbhava* domain; the *asitaphala* is the impure fruit which is in the *bhava* domain; they are givers of these fruits. The property of being without *mala* must be understood for the aforesaid classes of beings also.

Other than "tebhyo'pi (these)", i. e. these three classes, are the chiefs of *bhuvanas* who, being united with *mala*, through their mediation, execute the desire of the Lord. From them who execute the desire of the Lord the whole world of moving and unmoving beings is born. That means : through their intermediary the *śakti* enters the universe.

Now the function of *śakti* is told : "prabhuśakteḥ…".

From Lord's *śakti* Mantras whose power is not vain, are issued; by Śiva's desire they act in the vast path ending in Śiva. 6

["Prabhuśakteḥ" means :] the *śakti* of "prabhoḥ" i. e. the Lord; and the *śakti* who is "prabhvī" i. e. ruling resident in everything[83]. At first, for some souls, the nature of Mantra, called Śiva, characterised as omniscience and omni-action is covered by *mala*. This nature of Mantra is made manifest for those souls by Lord's *śakti* who destroy their *mala*. Therefore it is told that Mantras are born from Lord's *śakti*. Here "ca (also)" is used in the sense of coordination [with an implicit term; the meaning is :] superior Mantras or Mantreśvaras, and Mantras; as many Mantras and Lords of Mantras made of knowledge and protection there exist, as many are issued from Lord's *śakti*. The word Mantra in the present stanza has a delimitative sense : as many Mantras there are, from the Vidyeśas to the Niyogins, as many are issued from Lord's *śakti* only. Thus the *Sāñjanas* are excluded. One could object that these *Sāñjanas* also are issued from Lord's *śakti*. [We answer :] it is true, but they are not issued from Lord's *śakti* only, since they are issued from the bonds and from Lord's *śakti*, whereas the Mantras and Mantreśvaras are issued from Lord's *śakti* only in the afore-said manner.

[These Mantras, etc. here referred to], being thus born, act, being inhabited and ruled by Śiva's desire called Lord's *śakti*. One could object that this has already been told by the passage "tayodbalitasāmarthyāḥ…" (III. 3). [We answer thus.] In that passage (III. 3) it is told that [these Mantras, etc.] are incited to action by Śiva's desire; [and] this is valid also in the time of future activity [after the incitation]. But here [it is told that] only

पुनर्व्यापारकालेऽपि युक्तमिति । इह [४९४]त्वत्यन्तसंयोगेन परं शिवेच्छयोत्पद्यन्ते, तया च प्रयुज्यन्ते, व्यापारकालेऽपि तदधिष्ठिताः चेष्टन्त इति ।

क्व चेष्टन्ते । **शिवान्ते विततेऽध्वनि** । शिवादर्वाक् चेष्टन्त इति केचित् । न किल तेषां तत्र प्राप्तिरस्तीति । वयं तु ब्रूमः, शिवेऽपि [४९५]तत्सायुज्यप्रदानायाणोश्चेष्टन्त एवेति ।

अध्वनि चेष्टन्त इति श्रुत्वाध्वनोऽसंभवं मन्यमानः [४९६]स्वयंभूर्निधनेशं पृच्छति - अध्वा यातव्यमार्ग इत्यादि ।

अध्वा [४९७]यातव्यमार्गोऽत्र स च पत्युर्न विद्यते ।
[४९८]न च यातुर्गतिः पुंसो विभुत्वमनयोर्यतः ॥७॥

अध्वा हि नाम यातव्यस्य ग्रामादेर्मार्गः । इह च यातव्यः पतिः तस्य चासौ न विद्यते । अथ यातुः पुंसः परा गतिः श्रूयते । [४९९]तत्सिध्यर्थमध्वा भविष्यतीति । न च यातुर्गतिः पुंसः । किमर्थं पत्युर्यातव्यस्याध्वा न विद्यते, यातुश्च पुंसो गतिरिति । **विभुत्वमनयोर्यतः** । न हि कस्यचिद्विभोः [५००]प्राप्त्यर्थमध्वा दृष्टः । नापि कस्यचिद्विभोर्गतिर्दृष्टेति । एतदुक्तं भवति - "[५०१]विभुत्वात्पतिपुंसोः परस्परं प्राप्तमेव किमर्थमनयोरध्वकल्पना" इति ।

अथ तयोर्विभुत्वं च भविष्यति, गतिरपि विद्यत इत्येवं गतिमत्त्वं च भविष्यति । गतिमत्त्वाच्चाध्वकल्पनेति । विभुत्वे सति [५०२]च - **विभुत्वे गतिमत्त्वमि**त्यादि ।

[५०३]विभुत्वे गतिमत्त्वं तु विभुता गतिमत्त्वतः ।
न जातु युज्यते [५०४]यस्माद्वस्तुतोऽध्वा कुतस्तयोः ॥ ८ ॥

विभुत्वे सति गतिमत्त्वं गतिमत्त्वे च सति विभुता न जातु युज्यते । [५०५][य]स्मान्नैवंविधं किंचिद् दृष्टम्, अतोऽ**ध्वा**ध्वत्वं वस्तुतः कुतस्तयोरिति ।

इदानीमेव प्रश्नं पुरा वृत्तं [५०६]तस्य गुरोश्च प्रतिवचनं स्वशिष्याणां स्वयंभूः कथयति - **एवं संप्रश्नितेऽर्थेऽस्मिन्नि**त्यादि ।

because of very close association they are born [as Mantras, etc.] thanks to Śiva's desire, they are incited to action by the same, and in the time of action also, being inhabited and ruled by the same, they act.

Where do they act ? "Śivānte vitate 'dhvani". Some say : they act in the vicinity of Śiva; they, indeed, do not reach Śiva. But we say : even in Śiva they act to give the soul union with Śiva.

Having heard the words "they act in the path...", thinking of the impossibility of a path, Svayaṃbhū asks Nidhaneśa a question : "adhvā yātavyamārgaḥ...".

A path is a road to a destination. But there is no such [road] to the Lord and there is no motion of the soul aiming at this destination, because both are ubiquitous. 7

A path, in fact, is a road to a destination, for instance a village. Here the Lord is the destination. But there is no such [road] to him. Now an ultimate goal is revealed for the soul which goes [to the said destination].To realise this there will be a road. But there is no motion of the soul. Why is there no road to the Lord as destination and no motion of the soul ? Because both are ubiquitous, since one has never seen a road to reach something which is ubiquitous, nor a motion of an ubiquitous entity. That is told in : "Since they are ubiquitous, the Lord and the soul have already attained each other. Why should we imagine a path leading one to the other ?"[84]

Now [one could say :] there will be ubiquitousness for both, and considering that there exists motion also in such circumstances, there will be the possession of motion. And if they possess motion, we can imagine a path [leading one to the other]. And as they are ubiquitous [Svayaṃbhū says :] "vibhutve gatimattvam...".

Since, if there is ubiquitousness, the possession of motion is not at all proper, nor the ubiquitousness if there is possession of motion, how can there really be a path regarding these two ? 8

If there is ubiquitousness, the possession of motion, and, if there is possession of motion, the ubiquitousness are not at all proper. [Because] nothing of that sort has ever been seen, how could exist "adhvā" i. e. the nature of path [for anything] regarding these two [the Lord and the soul].

In the present time Svayaṃbhū says a question he asked in the past and the answer given by his guru : "evaṃ saṃpraśnite 'rthe 'smin...".

एवं संप्रश्निते‍ऽर्थे‍ऽ[५०७]स्मिन्मया पूर्वं द्विजोत्तमाः ।
प्राह गम्भीरया वाचा [५०८]प्रभुर्लोकेश्वरेश्वरः ॥ ९ ॥

[५०९]किम् । प्राह - **पतिपुंसोरि**त्यादि ।

पतिपुंसोर्विभुत्वे‍ऽपि [५१०]द्राघिष्ठो‍ऽध्वा तयोर्यथा ।
तथोच्यते शृणु ब्रह्मन्नयनं पुरुषस्य च ॥ १० ॥

तयोः पतिपुंसोर्विभुत्वे‍ऽपि सति द्राघिष्ठः प्रशस्ततमो युक्तियुक्तो‍ऽध्वा यथा भवति, [५११]अयनं गमनं च पुरुषस्य विभुत्वे‍ऽपि सति द्राघिष्ठं यथा भवति तथोच्यते शृणु ब्रह्मन्निति ।

शिवस्य [५१२]तावदध्वोच्यते पुरा पुरुषस्य - **दीक्षाकर्मे**त्यादि ।

दीक्षाकर्म क्रमेणोक्तं [५१३]मायापरिणतौ यतः ।
[५१४]सो‍ऽध्वा परिणतिस्तस्माद्देशातिशयवर्तिनी ॥११॥

यत्र पादविहरणाख्यं कर्म क्रमेण दृष्टं सो‍ऽध्वा [५१५]लोके प्रसिद्धः । इहापि **दीक्षाकर्म क्रमेणोक्तं मायापरिणतौ** । यत एवं **तस्मान्मायापरिणतिरध्वा** । कुतः । **अतिशयवर्तिनी** । तरतमयोगो‍ऽतिशयः । यथैकपादावष्टब्धाद्भूप्रदेशाद्द्वितीयपादावष्टब्धः परः तस्माच्चान्यः परतर इत्यादि । एवंविधं वस्त्वध्वोच्यते । एवं मायापरिणतेरप्येकस्मात्तत्त्वाद्भुवनाद्वा परमन्यत्तत्त्वं भुवनं वा तस्माच्चान्यत्परतरमित्यादि । अथ साप्यध्वा । केनातिशयेनातिशयवर्तिनी । देशातिशयवर्तिनी । देशश्चात्र दिग्देशो विवक्षितः । [५१६]आधस्त्यात्तत्त्वाद्भुवनाद्वोर्ध्वमन्यत्तत्त्वं भुवनं वा तस्माच्चोर्ध्वमन्यदित्यादि । किं मायापरिणतेर्व्यतिरिक्तो‍ऽध्वा । नास्ति, येन तस्या एवाध्वत्वं साध्यत इति । अस्ति हि तद्व्यतिरिक्तापि [५१७]वस्तुसंहतिर्मायापरिण[तेरु]दाहरणम् । ननु तस्या अपि [५१८]लोकप्रसिद्धो‍ऽध्वोदाहरणम् । सत्यम्, सापि तद्व्यतिरिक्ता या

When I asked about this matter, formerly, O excellent twice-born, the powerful Lord of the lords of the world spoke thus with a deep voice. 9

What [did he say] ? [Svayaṃbhū] tells it : "patipuṃsoḥ...".

How there is a very long path for the Lord and the soul, even though they are ubiquitous, I will tell it, listen, O Brahman, and I will tell also the motion of the soul. 10

How there is a path which is "drāghiṣṭhaḥ" i. e. very praiseworthy, established through logical reasoning, for the Lord and the soul, even though they are ubiquitous, and how there is "ayanam" i. e. a very long motion of the soul even though it is ubiquitous, I shall tell it, listen, O Brahman.

The path of Śiva is told first, before the path of the soul : "dīkṣākarma".

Because the rite of *dīkṣā* is described sequentially in the series of transformations of *māyā*, this series of transformations is the path; it has a gradation in space. 11

That in which the action called 'walk' is seen with a sequence, is well-known as a path in the world. In the present case also the rite of *dīkṣā* is described sequentially in the series of transformations of the *māyā*. Because it is thus, for that reason the path is the series of transformations of *māyā*. How ? "Atiśayavartinī". *Atiśaya* means : being united with more (*-tara*) and the most (*-tama*). For instance the place touched by the second step is higher than the place touched by the first one; the next place is still higher than the second one; and so on. [All] thing of that sort is called a path. In the same way in the series of transformations of *māyā* there is a second *tattva* or *bhuvana* which is higher than the first, and a next one still higher than the second, and so on. Thus even this series of transformations [which has a gradation] is a path. What is the type of this gradation ? "Deśātiśayavartinī (a gradation in space)". And the intended space here is the oriented space : the second *tattva* or *bhuvana* is above the lowest one; the next is above the second; and so on. Does there exist a path different from the series of transformations of *māyā* ? There is none, because the nature of path is established only for this series. For a collection of things[85], even different from [that path], is [only] an example for the series of transformations of *māyā*. One could object that the path which is well-known in the world is an example for this [collection of things] also. That is true, but that [series of transformations of *māyā*] is also an example for the different collection of things : as the

वस्तुसंहतेरुदाहरणम् । यथा [५१९]मायापरिणतौ दीक्षाकर्म क्रमेणोक्तमित्यतः साध्वा, एवं तद्व्यतिरिक्तायामपि वस्तुसंहतौ दीक्षाकर्म क्रमेणोक्तम् अतः साप्यध्वा । यथा च मायापरिणतिरतिशयवर्तिनीत्यध्वा, एवं तद्व्यतिरिक्तापि [५२०]वस्तुसंहतिरतिशयवर्तिनी । तस्मात् साप्यध्वा । केनातिशयेन । गुणातिशयवर्तिनी । यो हि यस्माद् गुणोत्कृष्टः स तस्मादूर्ध्वमिति ।

[५२१]**पुंबन्धभावमि**त्यादि ।

[५२२]पुंबन्धभावमापन्ना क्रमशः पत्युरिच्छया ।
[५२३]व्युत्क्रमेणापनेयासौ शिवाय गमनं प्रति ॥१२॥

किमर्थं मायापरिणतौ दीक्षाकर्म क्रमेणोक्तम् । यतः सा त्व**पनेया** । [५२४]तस्याश्चापनये दीक्षाकर्मोपायः । कस्मादपनेया । यतः क्रमशः **पुंबन्धभावमापन्ना**, अतोऽसौ **व्युत्क्रमेणाप्यपनेये**ति । किमुद्दिश्यासौ द्विरूपा [५२५]वस्तुपद्धतिरपनेया । **शिवाय गमनं प्रति** । पुंसः शिवप्राप्त्यर्थं [५२६]यद्गमनं तत्प्रति । तया व्युत्क्रमेणापनीयमानया [५२७]पुं[सो ग]मनं भवति, येन शिवं प्राप्नोति । [५२८]यतस्तस्या यस्य पदार्थस्तेन पुंसो बन्ध्यबन्धनलक्षणसंबन्धो दीक्षाकर्मणा पूर्वं क्रियते, ततश्चासौ पदार्थः पुंसोऽपनीयते । पुमांश्च तत उद्ध्रियते । [५२९]उपरितनपदार्थाभिमुखस्तत्संबन्धयोग्यः क्रियते । ततश्चोपरितनेन पदार्थेन [५३०]सह तयैव संयोज्यत इति । एवं तावच्छिवेन सह संयोज्यत इति । यैश्च सह पूर्वं संयुक्तः [५३१]त ए[व] तर्हि ततस्तावद् [५३२]व्युत्क्रमेणापनीयमाना अन्त्यपाशोपनीताः । ततश्चासावन्यशिवेन सह संयोज्यत इति ।

एवं पूर्वस्मात्पदार्थाद् [५३३]वियुज्यमानत्वाद् गतिमानात्मा । यश्च पूर्वस्माद्देशाद्वियुज्य उत्तरेण च संयोज्यते [५३४]स गतिमान् दृष्टः । पादविहरणाख्यां गतिमभिप्रेत्य [५३५][भवा]नचोदयत् । सा चास्माभिर्नेष्टा । न चोक्ता हि गतिर्विभुत्वेऽपि [५३६][विरुद्ध्यते] । अथ पुंसः सर्वैः पदार्थैः सह विशिष्ट एव संबन्ध इत्येवं चेत् सर्वेषां पुंसां सर्वेषु शरीरेषु

rite of *dīkṣā* is sequentially described in the series of transformations of *māyā* which, therefore, is a path, in the same way it is sequentially described in the different collection of things also, which, therefore, is a path. And as the series of transformations of *māyā* has a gradation and, therefore, is a path, in the same way the said different collection of things also has a gradation. Therefore it is a path. What type of gradation does it have ? It has a gradation in quality. That which is superior in quality to another thing, is above that thing.

"Puṃbandhabhāvam...".

[As this series of transformations of *māyā*] has taken the state of bond of the soul, according to a given order, following Lord's desire, it is to be eliminated in the reverse order, in view of the progress towards Śiva. 12

Why is the rite of *dīkṣā* described sequentially in the series of transformations of *māyā* ? Because that [series] is to be eliminated. And the rite of *dīkṣā* is the means to eliminate it. Why is it to be eliminated ? Because it has taken the state of bond of the soul, following a particular sequence, therefore it has to be eliminated through the reverse sequence. Aiming at what, one should eliminate this twofold[86] series of things ? "Śivāya gamanaṃ prati" : aiming at the progress of the soul towards the attainment of Śiva. There is a progress of the soul through [this series of transformations of *māyā*] which is to be eliminated in the reverse order; by that progress the soul attains Śiva. Because a relation of bound and bond, between the soul and something which belongs [to this series of transformations of *māyā*], is created by the rite of *dīkṣā* previously, for this reason that thing is removed from the soul, and the soul is released from it. [Then,] facing the item placed above [in the series, the soul] is rendered fit for this same relation [of bound and bond]. Then it is united with the item placed above through the same [*dīkṣā*]. Thus [at the end] it is united with Śiva. These things with which it is united previously, are eliminated afterwards in the reverse sequence and brought to the last bond. Then [the soul] is united with the last [*tattva*, called] *śiva-[tattva]*.

Thus the soul has a motion, because it is separated from a previous thing. We see that something which is separated from a previous place and then is united to an ulterior place, has a motion. And you thought of the motion called 'walk' when you did your objection. That motion [which is walk] is not accepted by us and the said motion [which is the establishment of relations with successive things], even for ubiquitous entities is not contradictory[87]. Moreover the relation of the soul with each entity is always a specific one for each. If it were as you say[88], there would be simultaneous experience of all things by

[५३७]युगपद्भोगः स्यात् । न च दृष्टः । तस्माद्विशिष्ट एव परापरफलप्रदः संबन्धोऽभ्युपगन्तव्य इति ।

सा हि मायापरिणतिरशुद्धत्वाद् [५३८]बन्धरूपत्वादपनेया । तुल्ये चाशुद्धत्वादपनेये क्रमेण व्युत्क्रमेणापनीयते क्रमेणेति । किमत्र कारणम् । **अन्तरङ्गतरे**त्यादि ।

[५३९]अन्तरङ्गतरा शोध्या बहिरङ्गतरापि च ।
[५४०]बहिरङ्गेऽपनीते स्यादन्तरङ्गक्रियाक्रमः ॥ १३ ॥

[५४१]सत्यमशुद्धत्वं तुल्यम्, तथाप्येषान्तरङ्गतरा अन्तरङ्गा बहिरङ्गा बहिरङ्गतरेत्येवं क्रमेण व्यवस्थिता, व्युत्क्रमेण बहिरङ्गतरा बहिरङ्गा अन्तरङ्गा अन्तरङ्गतरेत्येवं व्यवस्थिता । [५४२]बहिरङ्गापनीयते । स्यादन्तरङ्गापनयक्रियाक्रम इत्येवं क्रमन्यायतो [५४३]व्युत्क्रमेणापनीयते । तद्व्यतिरिक्ता वस्तुपद्धतिः [५४४]प्रेरकप्रेर्यनिमित्तनैमित्तिकमित्येवंविधेनान्तरङ्गबहिरङ्गभावेन [५४५]व्यवस्थिता । अतो ऽसावपि व्युत्क्रमेणापनेयेति ।

असौ [५४६]मायापरिणतिर्द्विरूपा - एका साधारणा सर्वपुरुषभोग्या भुवनाख्या, अन्या त्वसाधारणा प्रत्यात्मनियता तत्त्वभावभूताख्या । या तु साधारणा तस्या दीक्षाकर्म क्रमेणोक्तम् । न चासौ क्रमेण पुंबन्धभावमापन्ना । कुतः । यतः कर्मवशादनियमेनासावुपभुज्यते । न चास्या अन्तरङ्गबहिरङ्गभावोऽस्ति । एकस्य कर्तुरेकस्यां क्रियायां बहूनां साधनानामन्तरङ्गबहिरङ्गभावो दृष्टः । न चैकशिवस्य कर्तुरेकस्यां क्रियायां साधनत्वासाधनत्वं [५४७]प्रपद्यते । या त्वसाधरणा सा हि क्रमेण पुंबन्धभावमापन्ना । तस्याश्चान्तरङ्गबहिरङ्गभावोऽस्ति । न चैतस्या दीक्षाकर्म क्रमेणोक्तम्, यतः क्वचित्तस्यामपि दीक्षाकर्म क्रमेणोक्तमिति उदाहरणमात्रं तु [५४८]भवतीति न तर्हि दृष्टान्तः सर्वस्मिन्धर्मे नियोजयितुं शक्यत इति ।

उच्यते - भुवनरूपापि [५४९]प्रकृतिविकारलक्षणेनोर्ध्वाधोव्यवस्थानलक्षणेन च क्रमेण

all souls. And that is not seen. Therefore, one should accept that the soul has a different relation with each thing, giving a higher or lower result.

This series of transformations of *māyā* is to be eliminated, because it is impure and it is a bond. When something equal [to some *māyā* transformation] becomes fit to be eliminated in the sequence, because it is impure, it is eliminated sequentially in the reverse order. For what reason ? "Antaraṅgatarā...".

A more interior [transformation of *māyā*] becomes fit to be eliminated, as well as a more exterior one; once the exterior one has been eliminated, there takes place the course of action applied to the interior one. 13

It is true that the impurity is equal [for all products of *māyā*]. However [a transformation of *māyā*] is determined as more interior, interior, exterior, more exterior; in the reverse order it is determined as more exterior, exterior, interior, more interior. The exterior is eliminated. [Then] there should take place a course of action of elimination of the interior. According to this rule of succession the elimination in reverse order takes place. A different collection of things is determined in its character interior and exterior which consists of impeller and impelled, cause and effect. Therefore this [collection of things] also is to be eliminated in the reverse order.

[One could object :] this series of transformations of *māyā* is of two kinds : one is common, experienced by all the souls and called 'world' (*bhuvana*); the other is non-common, delimited for each soul and called 'essence, factors of the transmigrant body, elements of gross body' (*tattva, bhāva, bhūta*). The rite of *dīkṣā* is told sequentially for that one which is common. And that one has not taken sequentially the state of bond of the soul. Why ? Because it is experienced, not according to a fixed rule, but under the effect of *karman*. And it has no character of interior and exterior. The interior and exterior character is seen for multiple instruments of a unique action of a unique agent. And [this common series] does not become instrument or non-instrument of a unique action of the unique agent Śiva. But [the series] which is non-common takes sequentially the state of bond of the soul. And it has the interior and exterior character. And the rite of *dīkṣā* is not told sequentially for this one, because in its case it is told sequentially occasionally, so that it is only a matter of example. Now an example cannot be established as a universal property.

[To this objection] the following answer is given. [The common series of transformations] which consists of worlds, being determined by a sequence based on the state of original matter and transformation, or based on a classification in upper and lower,

व्यवस्थिता सती पुंबन्धभावमापद्यते [५५०]नेतरथा । एकस्य च पुंसः कर्तु-र्भोगसामान्याख्यायामेकस्यां क्रियायां तस्यामन्तरङ्गबहिरङ्गभावोऽस्ति । या विप्रकृष्टभोगसाधना सा बहिरङ्गतरेति एकस्य च शिवस्य कर्तुः सर्वपुरुषभोगद्रानाख्यायामेकस्यां क्रियायां भोगोत्कर्षापकर्षविवक्षायां [५५१]तस्यामन्तरङ्गबहिरङ्गभावो ऽस्तीत्यदोषः ।

एवमध्वेत्यादि ।

एवमध्वा [५५२]शिवस्योक्त उद्बन्धक्रमयुक्तितः ।
लोके चाध्वव्यवस्थेयं [५५३]दृष्टा वस्तुनिबन्धने ॥ १४ ॥

उद्बन्धनमुद्वेष्टनम् । उद्बन्धस्य क्रमो बहिरङ्गतरादिकः । सैव युक्तिः । तया शिवस्य प्राप्त्युपायोऽध्वा प्रोक्तः । पुंसां [५५४]बहिरङ्गतरादीनां क्रमेण बन्धनैस्तैरुद्वेष्टितैः सद्भिः शिवेन सहानुग्राह्यानुग्राहकलक्षणात् तत्सायुज्यफलप्राप्तिर्भवति । प्राप्तिमात्रमभिप्रेत्य [५५५]भवानध्वानम-[वोचत्] । तदसत्, प्राप्तिमात्रात् [५५६]तत्सायुज्यफलाभावप्रसङ्गात् । अतो विशिष्टापि प्राप्तिरभ्युपगन्तव्या । सा चोक्तेन क्रमेण भवति । क्रमतश्चाक्रमतश्चाध्वप्रसिद्धिः । अतो न दूषणम् ।

दृष्टान्तमाह - **लोके चे**त्यादि । इयं बहिरङ्गतरादिका दृष्टा वस्तुतो [५५७]निबन्धने ऽपगमे । निबन्धनं नाम विबन्धनम् । तस्मिन् क्रियमाणे । यथा हि चक्षुषः [५५८]पृ[थु]ग्रन्थिभिरनेकैर्वस्त्रैः सुवेष्टितस्य बहिरङ्गतरादिना [५५९]क्रमेणाशेषवस्त्रापगमतस्तस्य बाह्येन प्रकाशेन सहानुग्राह्यानुग्राहकलक्षणाद् [५६०]घटाद्या[लोचन]प्राप्तिः । एवं पुंसो बहिरङ्गतरादीनां [५६१]क्रमेणाशेषबन्धापगमात् ततस्तस्य शिवेन सह प्रोक्तलक्षणप्राप्तिरिति ।

इदानीं पुंसः परा गतिरुच्यते - **दग्धसंसारे**त्यादि ।

दग्धसंसारबीजस्य या पुंसोऽपश्चिमा [५६२]स्थितिः ।
[५६३]सा गतिस्तस्य विज्ञेया न देशान्तरसंस्थितिः ॥ १५ ॥

takes the state of bond of the soul not otherwise. And it has the character of interior and exterior with regard to that unique action called the general experience of the unique soul. That which is an instrument of experience situated far [from the subject] is more exterior. It has the interior and exterior character with regard to the unique action called "giving experience to all the souls", of the unique agent Śiva, when there is desire to express the high or low quality of the experience. Thus there is no defect.

"Evam adhvā...".

Thus a path of Śiva has been told on the basis of the sequence of that which surrounds [the soul]. And in the world such determination of a path is seen at the time of elimination of things. 14

Udbandhana means 'surrounding'. The sequence of that which surrounds is that of the most exterior thing, the exterior one, etc. This sequence itself is the reason [proving the existence of a path]. For this reason "adhvā", i. e. the means to reach Śiva, has been told. Because the relation of the souls with Śiva through the bonds which surround them in the order of the most exterior, etc. is based on their respective character of objects of grace and giver of grace, for this reason there is attainment of union with Śiva. You spoke about a path, thinking of any kind of the action to reach[89]. That is not proper, because by any kind of reaching the fruit which is the union with Śiva will not necessarily be realised. Therefore, the action to reach must be accepted as qualified. And it is [qualified] by the said order of sequence. It is well-known that there are paths through stages or without stages. Thus there is no defect.

[The author] gives an illustration : "loke ca...". This [determination of a path], i. e. the sequence, more exterior, exterior, etc. is seen in the case of a *nibandhana*, i. e. a process of elimination of something. *Nibandhana* means [here] *vibandhana* (elimination). [The meaning is :] when such an elimination is done. For instance, the eyes were covered by several pieces of cloth with big knots; by eliminating the pieces of cloth in the order, more exterior, etc., a relation is established between the eyes and external light; that relation is characterised by a favoured object and a favourable agent; by a relation of this kind the eyes arrive at the sight of things, a pot, etc. In the same way by elimination of all the bonds, in the order, more exterior, etc. there is the said relation between the soul and Śiva and then attainment.

Now the supreme motion of the soul is told : "dagdhasaṃsāra-...".

The ultimate establishment of the soul in which the seed of the birth cycle has been burnt, must be known as its motion; it is not an establishment in a new place. 15

दीक्षाग्निना दग्धपशुत्वस्य या पुंसोऽपश्चिमा [५६४]शिवसायुज्याख्यावसानिकी स्थितिर्यस्याः स्थितेर्न स्रवते सा गतिस्तस्य विज्ञेया। न देशान्तरसंस्थितिः प्रदेशान्तरप्राप्त्युपायभूता न रम्या पुरुषस्य।

एवं पादविहरणाख्यां गतिमभिप्रेत्य [५६५]भवानचोदयत्। सा च नेष्टा। न चोक्ता [५६६]हि गतिर्विभुत्वेऽपि विरुध्यत इति निदर्शनम् - **धर्माद्धर्मान्तरे**त्यादि।

[५६७]धर्माद्धर्मान्तरव्यक्तौ सत्यां लोके गतं यथा।
प्रोच्यते [५६८]पटपर्णादि वस्तु तद्वत्पुमानपि ॥ १६ ॥

इति [५६९]स्वायम्भुवसूत्रसंग्रहे [५७०]तृतीय अनुग्रहशक्तिपटलः ॥

धर्मादेकस्मादपगताद्धर्मान्तर[५७१]व्यक्तौ सत्यां लोके नीलतां विहाय पीततां गतमिति यथा प्रोच्यते [५७२]पट[प]र्णादि वस्तु तद्वत्पुमानपि पश्ववस्थां विहाय पत्यवस्थां गत इत्याशयः ॥

इति स्वायम्भुवसूत्रसंग्रहे तृतीयस्याध्यायस्य सद्योज्योतिष्कृता टीका समाप्ता ॥

The "apaścimā" i. e. final establishment called union with Śiva, of the soul whose nature of bound soul has been burnt by the fire of *dīkṣā*, that establishment from which one does not return, is to be known as the motion of that soul. This motion is not "deśāntarasaṃsthitiḥ", i. e. the motion which is an establishment in a new place is not pleasing to the soul.

Thus, you have done your objection, thinking of the motion called 'walk'. But this is not accepted [by us]. And the said motion [of the soul] is not contradicted by the idea of its ubiquity. [The author] illustrates it : "dharmād dharmāntara-...".

